# Collected prayers by Raghunatha Dasa Goswami Stavavali

# સ્તવાવલીસઙ્ગ્રહઃ

## Document Information

Text title : Collected prayers by Raghunatha Dasa Goswami Stavavali

File name : stavAvalI.itx

Category : vishhnu, raghunAthadAsagosvAmin, krishna, stavAvalI, sangraha, vishnu, stava

Location : doc_vishhnu

Author : RaghunathadAsagosvAmi

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 15, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# સ્તવાવલીસઙ્ગ્રહઃ

Contents                    અનુક્રમણિકા

stavAvalIsangraha  સ્તવાવલીસઙ્ગ્રહઃ
Shachisunvashtakam  શચીસૂન્વષ્ટકમ્
Shri Gaurangastavakalpataruh  શ્રીગૌરાઙ્ગસ્તવકલ્પતરુઃ
Manahshiksha  મનઃશિક્ષા
Shri Raghunathadasagosvaminah Prarthana  શ્રીરઘુનાથદાસગોસ્વામિનઃ પ્રાર્થના
Govardhanashrayadashakam  ગોવર્ધનાશ્રયદશકમ્
Govardhanavasaprarthanadashakam  ગોવર્ધનવાસપ્રાર્થનાદશકમ્
Radhakundashtakam  રાધાકુણ્ડાષ્ટકમ્
Shri Vilapakusumanjalih  શ્રીવિલાપકુસુમાઞ્જલિઃ
Vrajavilasastava  વ્રજવિલાસસ્તવ
Shri Radhikayah Premapurabhidhastotram  શ્રીરાધિકાયાઃ પ્રેમપૂરાભિધસ્તોત્રમ્
Shri Shrigranthakartuh Prarthana  શ્રીશ્રીગ્રન્થકર્તુઃ પ્રાર્થના
Svaniyamadashakam  સ્વનિયમદશકમ્
Shriradhikashtottarashatanamastotram  શ્રીરાધિકાષ્ટોત્તરશતનામસ્તોત્રમ્
Radhikashtakam  રાધિકાષ્ટકમ્ રઘુનાથદાસગોસ્વામિ
Premambhojamarandastavarajah  પ્રેમામ્ભોજમરન્દસ્તવરાજઃ
Svasankalpaprakashastotram  સ્વસઙ્કલ્પપ્રકાશસ્તોત્રમ્
Shri Shriradhakrishnojjvalakusumakelih  શ્રીશ્રીરાધાકૃષ્ણોજ્જ્વલકુસુમકેલિઃ
Prarthanamritastotram  પ્રાર્થનામૃતસ્તોત્રમ્
Navashtakam  નવાષ્ટકમ્
Shri Gopalarajastotra  શ્રીગોપાલરાજસ્તોત્રમ્
Shri Madanagopalastotram  શ્રીમદનગોપાલસ્તોત્રમ્
Shri Vishakhanandabhidhastotram  શ્રીવિશાખાનન્દાભિધસ્તોત્રમ્
Shri Mukundashtakam  શ્રીમુકુન્દાષ્ટકમ્

Utkanthadashakam ઉત્કણ્ઠાદશકમ્
Shri Navayuvadvandvadidrikshashtakam શ્રીનવયુવદ્વન્દ્વદિદૃક્ષાષ્ટકમ્
Abhishtaprarthanashtakam અભીષ્ટપ્રાર્થનાષ્ટકમ્
Shri Dananirvartanakundashtakam શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકમ્
Shri Prarthanashrayachaturdashakam શ્રીપ્રાર્થનાશ્રયચતુર્દશકમ્
Abhishtasuchanam અભીષ્ટસૂચનમ્

# સ્તવાવલીસઙ્ગ્રહઃ

## Shachisunvashtakam ॥ શચીસૂન્વષ્ટકમ્ ॥

હરિર્દૃષ્ટ્વા ગોષ્ઠે મુકુરગતમાત્માનમતુલં
સ્વમાધુર્યં રાધપ્રિયતરસખીવાપ્તુમભિતઃ ।
અહો ગૌડે જાતઃ પ્રભુરપરગૌરૈકતનુભાક્
શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૧॥

પુરીદેવયાન્તઃપ્રણયમધુના સ્નાનમધુરો
મુહુર્ગોવિન્દોદ્યદ્વિશદપરિચર્યાર્ચિતપદઃ ।
સ્વરૂપસ્ય પ્રાણાર્બુદપરિચર્યાર્ચિતપદઃ
શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૨॥

દધાનઃ કૌપીનં તદુપરિ બહિર્વસ્ત્રમરુણં
પ્રકાણ્ડો હેમાદ્રિદ્યુતિભિરભિતઃ સેવિતતનુઃ ।
મુદા ગાયન્નુચ્ચૈર્નિજમધુરનામાવલિમસૌ
શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૩॥

અનાવેદ્યાં પૂર્વૈરપિ મુનિગણૈર્ભક્તિનિપુણૈઃ
શ્રુતેર્ગૂઢાં પ્રેમોજ્જ્વલરસફલાં ભક્તિલતિકામ્ ।
કૃપાલુસ્તાં ગૌડે પ્રભુ અતિકૃપાભિઃ પ્રકટય-
ન્શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૪॥

નિજત્વે ગૌડીયાન્જગતિ પરિગૃહ્ય પ્રભુરિમા-
ન્હરે કૃષ્ણેત્યેવં ગણનવિધિના કીર્તયત ભોઃ ।
ઇતિ પ્રાયાં શિક્ષાં ચરણમધુપેભ્યઃ પરિદિશ-
ન્શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૫॥

પુરઃ પશ્યન્નીલાચલપતિમુરુપ્રેમનિવહૈઃ
ક્ષરન્નેત્રામ્ભોભિઃ સ્નપિતનિજદીર્ઘોજ્જ્વલતનુઃ ।

સદા તિષ્ઠન્દેશે પ્રણયિગરુડસ્તમ્ભચરમે
    શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૬॥

મુદા દન્તારિ દૃષ્ટ્વા દ્યુતિવિજિતબન્ધૂકમધરં
    કરં કૃત્વા વામં કટિનિહિતમન્યં પરિલસન્।
સમુત્થાપ્ય પ્રેમ્ણાગણિતપુલકો નૃત્યકુતુકી
    શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૭॥

સરોત્તીરારામે વિરહવિધુરો ગોકુલવિધો-
    ર્નદીમન્યાં કુર્વન્નયનજલધારાવિતતિભિઃ ।
મુહુર્મૂર્ચ્છાં ગચ્છન્મૃતકમિવ વિશ્વં વિરચય-
    ન્શચીસૂનુઃ કિં મે નયનસરણીં યાસ્યતિ પદમ્ ॥ ૮॥

શચીસૂનોરસ્યાષ્ટકમિદમભીષ્ટં વિરચય-
    ન્સદા દૈન્યોદ્રેકાદતિવિશદબુદ્ધિઃ પઠતિ યઃ ।
પ્રકામં ચૈતન્યઃ પ્રભુરતિકૃપાવેશવિવશઃ
    પૃથુપ્રેમામ્ભોધૌ પ્રથિતરસદે મજ્જયતિ તમ્ ॥ ૯॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીશચીસૂન્વષ્ટકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Gaurangastavakalpataruh ॥ શ્રીગૌરાઙ્ગસ્તવકલ્પતરુઃ ॥

ગતિં દૃષ્ટ્વા યસ્ય પ્રમદગજવર્યેઽખિલજના
    મુખં ચ શ્રીચન્દ્રોપરિ દધતિ થૂત્કારનિવહમ્ ।
સ્વકાન્ત્યા યઃ સ્વર્ણાચલમધરયચ્છીધુ ચ વચ-
    સ્તરઙ્ગૈર્ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૧॥

અલઙ્કૃત્યાત્માનં નવવિવિધરત્નૈરિવ વલ
    દ્વિવર્ણત્વસ્તમ્ભાસ્ફુટવચનકમ્પાશ્રુપુલકૈઃ ।
હસન્સ્વિદ્યન્નૃત્યન્શિતિગિરિપતેર્નિર્ભરમુદે
    પુરઃ શ્રીગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૨॥

રસોલ્લાસૈસ્તિર્યગ્ગતિભિરભિતો વારિભિરલં
    દૃશોઃ સિઞ્ચન્લોકાનરુણજલયન્ત્રત્વમિતયોઃ ।
મુદા દન્તૈર્દૃષ્ટ્વા મધુરમધરં કમ્પચલિતૈ-
    ર્નટન્શ્રીગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૩॥

ક્વચિન્મિશ્રાવાસે વ્રજપતિસુતસ્યોરુવિરહા-
    ત્શ્લથચ્છ્રીસન્ધિત્વાદ્દધદધિકદૈર્ઘ્યં ભુજપદોઃ ।
લુઠન્ભૂમૌ કાક્વા વિકલવિકલં ગદ્ગદવચા
    રુદન્શ્રીગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૪॥

અનુદ્ઘાટ્ય દ્વારત્રયમુરુ ચ ભિત્તિત્રયમહો
    વિલઙ્ઘ્યોચ્ચૈઃ કાલિઙ્ગિકસુરભિમધ્યે નિપતિતઃ ।
તનૂદ્યત્સઙ્કોચાત્કમઠ ઇવ કૃષ્ણોરુવિરહા-
    દ્વિરાજન્ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૫॥

સ્વકીયસ્ય પ્રાણાર્બુદસદૃશગોષ્ઠસ્ય વિરહા-
    ત્પ્રલાપાનુન્માદાત્સતતમતિ કુર્વન્વિકલધીઃ ।

દધદ્ભિત્તૌ શશ્વદ્વદનવિધુઘર્ષેણ રુધિરં
    ક્ષાતોત્થં ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૬॥

ક્વ મે કાન્તઃ કૃષ્ણસ્ત્વરિતમિહ તં લોકય સખે
    ત્વમેવેતિ દ્વારાધિપમભિવદન્નુન્મદ ઇવ ।
દ્રુતં ગચ્છ દ્રષ્ટું પ્રિયમિતિ તદુક્તેન ધૃતત-
    દ્ભુજાન્તર્ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૭॥

સમીપે નીલાદ્રેશ્ચટકગિરિરાજસ્ય કલના-
    દયે ગોષ્ઠે ગોવર્ધનગિરિપતિં લોકિતુમિતઃ ।
વ્રજન્નસ્મીત્યુક્ત્વા પ્રમદ ઇવ ધાવન્નવધૃતો
    ગણૈઃ સ્વૈર્ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૮॥

અલં દોલાખેલામહસિ વરતન્મણ્ડપતલે
    સ્વરૂપેણ સ્વેનાપરનિજગણેનાપિ મિલિતઃ ।
સ્વયં કુર્વન્નામ્નામતિમધુરગાનં મુરભિદઃ
    સરઙ્ગો ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૯॥

દયાં યો ગોવિન્દે ગરુડ ઇવ લક્ષ્મીપતિરલં
    પુરીદેવે ભક્તિં ય ઇવ ગુરુવર્યે યદુવરઃ ।
સ્વરૂપે યઃ સ્નેહં ગિરિધર ઇવ શ્રીલસુબલે
    વિધત્તે ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૧૦॥

મહાસમ્પદ્દાવાદપિ પતિતમુદ્ધૃત્ય કૃપયા
    સ્વરૂપે યઃ સ્વીયે કુજનમપિ માં ન્યસ્ય મુદિતઃ ।
ઉરોગુઞ્જાહારં પ્રિયમપિ ચ ગોવર્ધનશિલાં
    દદૌ મે ગૌરાઙ્ગો હૃદય ઉદયન્માં મદયતિ ॥ ૧૧॥

ઇતિ શ્રીગૌરાઙ્ગોદ્ગતવિવિધસદ્ભાવકુસુમ
    પ્રભાભ્રાજત્પદ્યાવલિલલિતશાખં સુરતરુમ્ ।
મુહુર્યોઽતિશ્રદ્ધૌષધિવરબલત્પાઠસલિલૈ-
    રલં સિઞ્ચેદ્વિન્દેત્સરસગુરુતલ્લોકનફલમ્ ॥ ૧૨॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીગૌરાઙ્ગસ્તવકલ્પતરુઃ સમાપ્તઃ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Manahshiksha ॥ મનઃશિક્ષા ॥

ગુરૌ ગોષ્ઠે ગોષ્ઠાલયિષુ સુજને ભૂસુરગણે
 સ્વમન્ત્રે શ્રીનામ્નિ વ્રજનવયુવદ્વન્દ્વસ્મરણે । (દ્વન્દ્વશરણે)
સદા દમ્ભં હિત્વા કુરુ રતિમપૂર્વામતિતરા-
 મયે સ્વાન્તર્ભ્રાતશ્ચટુભિરભિયાચે ધૃતપદઃ ॥ ૧॥

ન ધર્મં નાધર્મં શ્રુતિગણનિરુક્તં કિલ કુરુ
 વ્રજે રાધાકૃષ્ણપ્રચુરપરિચર્યામિહ તનુ ।
શચીસૂનું નન્દીશ્વરપતિસુતત્વે ગુરુવરં
 મુકુન્દપ્રેષ્ઠત્વે સ્મર પરમજસ્રં નનુ મનઃ ॥ ૨॥

યદીચ્છેરાવાસં વ્રજભુવિ સરાગં પ્રતિજનુ-
 ર્યુવદ્વન્દ્વં તચ્ચેત્પરિચરિતુમારાદભિલષેઃ ।
સ્વરૂપં શ્રીરૂપં સગણમિહ તસ્યાગ્રજમપિ
 સ્ફુટં પ્રેમ્ણા નિત્યં સ્મર નમ તદા ત્વં શ‍ૃણુ મનઃ ॥ ૩॥

અસદ્વાર્તાવેશ્યા વિસૃજ મતિસર્વસ્વહરણીઃ
 કથામુક્તિવ્યાઘ્યા ન શ‍ૃણુ કિલ સર્વાત્મગિલનીઃ ।
અપિ ત્યક્ત્વા લક્ષ્મીપતિરતિમિતો વ્યોમનયનીં
 વ્રજે રાધાકૃષ્ણૌ સ્વરતિમણિદૌ ત્વં ભજ મનઃ ॥ ૪॥

અસચ્ચેષ્ટાકષ્ટપ્રદવિકટપાશાલિભિરિહ
 પ્રકામં કામાદિપ્રકટપથપાતિવ્યતિકરૈઃ ।
ગલે બદ્ધ્વા હન્યેઽહમિતિ બકભિદ્વર્ત્મપગણે
 કુરુ ત્વં ફુત્કારાનવતિ સ યથા ત્વાં મન ઇતઃ ॥ ૫॥

અરે ચેતઃ પ્રોદ્યત્કપટકુટિનાટીભરખર-
 ક્ષરન્મૂત્રે સ્નાત્વા દહસિ કથમાત્માનમપિ મામ્ ।

સદા ત્વં ગાન્ધર્વાગિરિધરપદપ્રેમવિલસ-
　　ત્સુધામ્ભોધૌ સ્નાત્વા ત્વમપિ નિતરાં માં ચ સુખય ॥ ૬॥ (સ્વમપિ)

પ્રતિષ્ઠાશા ધૃષ્ટા શ્વપચરમણી મે હૃદિ નટે-
　　ત્કથં સાધુપ્રેમા સ્પૃશતિ શુચિરેતન્નનુ મનઃ ।
સદા ત્વં સેવસ્વ પ્રભુદયિતસામન્તમતુલં
　　યથા ત્વાં નિષ્કાશ્ય ત્વરિતમિહ તં વેશયતિ સઃ ॥ ૭॥

યથા દુષ્ટત્વં મે દવયતિ શઠસ્યાપિ કૃપયા
　　યથા મહ્યં પ્રેમામૃતમપિ દદાત્યુજ્જ્વલમસૌ ।
યથા શ્રીગાન્ધર્વાભજનવિધયે પ્રેરયતિ માં
　　તથા ગોષ્ઠે કાક્વા ગિરિધરમિહ ત્વં ભજ મનઃ ॥ ૮॥

મદીશાનાથત્વે વ્રજવિપિનચન્દ્રં વ્રજવને-
　　શ્વરીં તન્નાથત્વે તદતુલસખીત્વે તુ લલિતામ્ । (મન્નાથત્વે)
વિશાખાં શિક્ષાલીવિતરણગુરુત્વે પ્રિયસરો-
　　ગિરીન્દ્રૌ તત્પ્રેક્ષાલલિતરતિદત્વે સ્મર મનઃ ॥ ૯॥

રતિં ગૌરીલીલે અપિ તપતિ સૌન્દર્યકિરણૈઃ
　　શચીલક્ષ્મીસત્યાઃ પરિભવતિ સૌભાગ્યવલનૈઃ ।
વશીકારૈશ્ચન્દ્રાવલિમુખનવીનવ્રજસતીઃ
　　ક્ષિપત્યારાદ્યા તાં હરિદયિતરાધાં ભજ મનઃ ॥ ૧૦॥

સમં શ્રીરૂપેણ સ્મરવિવશરાધાગિરિભૃતો-
　　ર્વ્રજે સાક્ષાત્સેવાલભનવિધયે તદ્ગણયુજોઃ ।
તદિજ્યાખ્યાધ્યાનશ્રવણનતિપઞ્ચામૃતમિદં
　　ધયન્નીત્યા ગોવર્ધનમનુદિનં ત્વં ભજ મનઃ ॥ ૧૧॥

મનઃશિક્ષાદૈકાદશકવરમેતન્મધુરયા
　　ગિરા ગાયત્યુચ્ચૈઃ સમધિગતસર્વાર્થયતિ યઃ ।
સયૂથઃ શ્રીરૂપાનુગ ઇહ ભવન્ગોકુલવને
　　જનો રાધાકૃષ્ણાતુલભજનરત્નં સ લભતે ॥ ૧૨॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
　　　　શ્રીપ્રાર્થનામૃતસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Raghunathadasagosvaminah Prarthana ॥
## શ્રીરઘુનાથદાસગોસ્વામિનઃ પ્રાર્થના ॥

પ્રાતઃ પીતપટે કુચોપરિરુષા ઘૂર્ણાભરે લોચને
બિમ્બૌષ્ઠે પૃથુ વીક્ષતે જટિલયા સન્દૃશ્યમાને મુહુઃ ।
વાચા યુક્તિજુષા મૃષા લલિતયા તાં સંપ્રતાર્ય ક્રુધા
દૃષ્ટ્વેમં હૃદિ ભીષિતા સ્તુતવતી રાધા ધ્રુવં પાતુ વઃ ॥ ૧॥

પીકપટુરવવાદ્યૈર્ભૃઙ્ગઝઙ્કારગાનૈઃ
સ્ફુરદતુલકુડુઙ્ગક્રોડરઙ્ગે સરઙ્ગમ્ ।
સ્મરસદસિ કૃતોદ્યન્નૃત્યતઃ શ્રાન્તગાત્રં
વ્રજનવયુવયુગ્મં નર્તકં વીજયાનિ ॥ ૨॥

કુહૂકણ્ઠીકણ્ઠાદપિ કમનકણ્ઠી મયિ પુન-
ર્વિશાખા ગાનસ્યાપિ ચ રુચિરશિક્ષાં પ્રણયતુ ।
યથાહં તેનૈતદ્યુવયુગલમુલ્લાસ્ય સગણા-
લ્લભે રાસે તસ્માન્મણિપ્રદકહારાનિહ મુહુઃ ॥ ૩॥

કાન્ત્યા નિન્દન્તમુદ્યજ્જલધરનિચયં તપ્તકાર્તસ્વભાવં
વાસો બિભ્રાણમીષત્સ્મિતરુચિરમુખામ્ભોજમાકલ્પિતાઙ્ગમ્ ।
વામાઙ્કે રાધિકાં તાં પ્રથમરસકલાકેલિસૌભાગ્યમત્તં
આલિઙ્ગ્યાલાપભઙ્ગ્યા વ્રજપતિતનયં સ્મેરયન્તં સ્મરામિ ॥ ૪॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીરઘુનાથદાસગોસ્વામિનઃ પ્રાર્થના સમાપ્તા ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Govardhanashrayadashakam ॥ ગોવર્ધનાશ્રયદશકમ્ ॥

સપ્તાહં મુરજિત્કરામ્બુજપરિભ્રાજત્કનિષ્ઠાઙ્ગુલિ
    પ્રોદ્યદ્વલ્ગુવરાતકોપરિમિલન્મુગ્ધદ્વિરેફોઽપિ યઃ ।
પાથઃક્ષેપકશક્રનક્રમુખતઃ ક્રોડે વ્રજં દ્રાગ્ અપા-
    ત્કસ્તં ગોકુલબન્ધવં ગિરિવરં ગોવર્ધનં નાશ્રયેત્ ॥ ૧॥

ઇન્દ્રત્વે નિભૃતં ગવાં સુરનદીતોયેન દીનાત્મના
    શક્રેણાનુગતા ચકાર સુરભિર્યેનાભિષેકં હરેઃ ।
યત્કચ્છેઽજનિ તેન નન્દિતજનં ગોવિન્દકુણ્ડં કૃતી
    કસ્તં ગોનિકરેન્દ્રપટ્ટશિખરં ગોવર્ધનં નાશ્રયેત્ ॥ ૨॥

સ્વર્ધુન્યાદિવરેણ્યતીર્થગણતો હૃદ્યાન્યજસ્રં હરેઃ
    સીરિબ્રહ્મહરાપ્સરઃપ્રિયકતત્શ્રીદાનકુણ્ડાન્યપિ ।
પ્રેમક્ષેમરુચિપ્રદાનિ પરિતો ભ્રાજન્તિ યસ્ય વ્રતી
    કસ્તં મન્યમુનીન્દ્રવર્ણિતગુણં ગોવર્ધનં નાશ્રયેત્ ॥ ૩॥

જ્યોત્સ્નામોક્ષણમાલ્યહારસુમનોગૌરીબલારિધ્વજા
    ગાન્ધર્વાદિસરાંસિ નિર્ઝરગિરિઃ શૃઙ્ગારસિંહાસનમ્ ।
ગોપાલોઽપિ હરિસ્થલં હરિરપિ સ્ફૂર્જન્તિ યત્સર્વતઃ
    કસ્તં ગોમૃગપક્ષિવૃક્ષલલિતં ગોવર્ધનં નાશ્રયેત્ ॥ ૪॥

ગઙ્ગાકોટ્યધિકં બકારિપદજારિષ્ટારિકુણ્ડં વહ-
    ન્ભક્ત્યા યઃ શિરસા નતેન સતતં પ્રેયાન્શિવાદપ્યભૂત્ ।
રાધાકુણ્ડમણિં તથૈવ મુરજિત્પ્રૌઢપ્રસાદં દધા-
    ત્પ્રેયઃસ્તવ્યમનોઽભવત્ક ઇહ તં ગોવર્ધનં નાશ્રયેત્ ॥ ૫॥

યસ્યાં માધવનાવિકો રસવતીમાધાય રાધાં તરૌ
    મધ્યે ચઞ્ચલકેલિપાતવલનાત્ત્રાસૈઃ સ્તુવત્યાસ્તતઃ ।

સ્વાભિષ્ઠં પણમાદધે વહતિ સા યસ્મિન્મનોજાહ્નવી
    કસ્તં તન્નવદમ્પતિપ્રતિભુવં ગોવર્ધનં નાશ્રયેત્ ॥ ૬॥

રાસે શ્રીશતવન્દ્યસુન્દરસખી વૃન્દાઞ્ચિતા સૌરભ
    ભ્રાજત્કૃષ્ણરસાલબાહુવિલસત્કણ્ઠી મધૌ માધવી ।
રાધા નૃત્યતિ યત્ર ચારુ વલતે રાસસ્થલી સા પરા
    યસ્મિન્સ સુકૃતી તમુન્નતમયે ગોવર્ધનં નાશ્રયેત્ ॥ ૭॥

યત્ર સ્વીયગણસ્ય વિક્રમભૃતા વાચા મુહુઃ ફુલ્લતોઃ
    સ્મેરક્રૂરદૃગન્તવિભ્રમશરૈઃ શશ્વન્મિથો વિદ્ધયોઃ ।
તદ્યૂનોર્નવદાનસૃષ્ટિજકલિર્ભઙ્ગ્યા હસન્જૃમ્ભતે
    કસ્તં તત્પૃથુકેલિસૂચનશિલં ગોવર્ધનં નાશ્રયેત્ ॥ ૮॥

શ્રીદામાદિવયસ્યસઞ્ચયવૃતઃ સઙ્કર્ષણેનોલ્લસ-
    ન્યસ્મિન્ગોચયચારુચારણપરો રીરીતિ ગાયત્યસૌ ।
રઙ્ગે ગૂઢગુહાસુ ચ પ્રથયતિ સ્મારક્રિયાં રાધયા
    કસ્તં સૌભગભૂષિતાઞ્ચિતતનું ગોવર્ધનં નાશ્રયેત્ ॥ ૯॥

કાલિન્દીં તપનોદ્ભવં ગિરિગણાનત્યુન્નમાચેખરા-
    ન્શ્રીવૃન્દાવિપિનં જનેપ્સિતધરં નન્દીશ્વરં ચાશ્રયમ્ ।
હિત્વા યં પ્રતિપૂજયન્વ્રજકૃતે માનં મુકુન્દો દદૌ
    કસ્તં શ‍ૃઙ્ગિકિરીટિનં ગિરિનૃપં ગોવર્ધનં નાશ્રયેત્ ॥ ૧૦॥

તસ્મિન્વાસદમસ્ય રમ્યદશકં ગોવર્ધનસ્યેહ ય-
    ત્પ્રાદુર્ભૂતમિદં યદીયકૃપયા જીર્ણાન્ધવક્ત્રાદપિ ।
તસ્યોદ્યદ્ગુણવૃન્દબન્ધુરખણેર્જીવાતુરૂપસ્ય તત્-
    તોષાયાપ્યલં ભવત્વિહ ફલં પક્વં મયા મૃગ્યતે ॥ ૧૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીગોવર્ધનવાસપ્રાર્થનાદશકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Govardhanavasaprarthanadashakam ॥ ગોવર્ધનવાસપ્રાર્થનાદશકમ્ ॥

નિજપતિભુજદણ્ડચ્છત્રભાવં પ્રપદ્ય
પ્રતિહતમદધૃષ્ટોદ્દણ્ડદેવેન્દ્રગર્વ ।
અતુલપૃથુલશૈલશ્રેણિભૂપ પ્રિયં મે
નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૧॥

પ્રમદમદનલીલાઃ કન્દરે કન્દરે તે
રચયતિ નવયૂનોર્દ્વન્દ્વમસ્મિન્નમન્દમ્ ।
ઇતિ કિલ કલનાર્થં લગ્નકસ્તદ્દ્વયોર્મે
નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૨॥

અનુપમમણિવેદીરત્નસિંહાસનોર્વી-
રુહઝરદરસાનુદ્રોણિસઙ્ઘેષુ રઙ્ગૈઃ ।
સહ બલસખિભિઃ સઙ્ખેલયન્સ્વપ્રિયં મે
નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૩॥

રસનિધિનવયૂનોઃ સાક્ષિણીં દાનકેલે-
ર્દ્યુતિપરિમલવિદ્ધં શ્યામવેદિં પ્રકાશ્ય ।
રસિકવરકુલાનાં મોદમાસ્ફાલયન્મે
નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૪॥

હરિદયિતમપૂર્વં રાધિકાકુણ્ડમાત્મ-
પ્રિયસખમિહ કણ્ઠે નર્મણાલિઙ્ગ્ય ગુપ્તઃ ।
નવયુવયુગખેલાસ્તત્ર પશ્યન્રહો મે
નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૫॥

સ્થલજલતલશષ્પૈર્ભૂરુહછાયયા ચ
પ્રતિપદમનુકાલં હન્ત સંવર્ધયન્ગાઃ ।

ત્રિજગતિ નિજગોત્રં સાર્થકં ખ્યાપયન્મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૬॥

સુરપતિકૃતદીર્ઘદ્રોહતો ગોષ્ઠરક્ષાં
    તવ નવગૃહરૂપસ્યાન્તરે કુર્વતૈવ ।
અઘબકરિપુણોચ્ચૈર્દત્તમાન દ્રુતં મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૭॥

ગિરિનૃપહરિદાસશ્રેણિવર્યેતિનામા-
    મૃતમિદમુદિતં શ્રીરાધિકાવક્ત્રચન્દ્રાત્ ।
વ્રજનવતિલકત્વે ક્લ્પ્તવેદૈઃ સ્ફુટં મે
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૮॥

નિજજનયુતરાધાકૃષ્ણમૈત્રીરસાક્ત-
    વ્રજનરપશુપક્ષિવ્રાતસૌખ્યૈકદાતઃ ।
અગણિતકરુણત્વાન્મં ઉરીકૃત્ય તાન્તં
    નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૯॥

નિરુપધિકરુણેન શ્રીશચીનન્દનેન
    ત્વયિ કપટિશઠોઽપિ ત્વત્પ્રિયેનાર્પિતોઽસ્મિ ।
ઇતિ ખલુ મમ યોગ્યાયોગ્યતાં મામગૃહ્ણ-
    ન્નિજનિકટનિવાસં દેહિ ગોવર્ધન ત્વમ્ ॥ ૧૦॥

રસદદશકમસ્ય શ્રીલગોવર્ધનસ્ય
    ક્ષિતિધરકુલભર્તુર્યઃ પ્રયત્નાદધીતે ।
સ સપદિ સુખદેઽસ્મિન્વાસમાસાદ્ય સાક્ષા-
    ચ્છુભદયુગલસેવારત્નમાપ્નોતિ તૂર્ણમ્ ॥ ૧૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીગોવર્ધનવાસપ્રાર્થનાદશકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Radhakundashtakam ॥ રાધાકુણ્ડાષ્ટકમ્ ॥

વૃષભદનુજનાશાન્નર્મધર્મોક્તિરઙ્ગૈ-
    ર્નિખિલનિજસખીભિર્યત્સ્વહસ્તેન પૂર્ણમ્ ।
પ્રકટિતમપિ વૃન્દારણ્યરાજ્ઞા પ્રમોદૈ-
    સ્તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૧॥

વ્રજભુવિ મુરશત્રોઃ પ્રેયસીનાં નિકામૈ-
    રસુલભમપિ તૂર્ણં પ્રેમકલ્પદ્રુમં તમ્ ।
જનયતિ હૃદિ ભૂમૌ સ્નાતુરુચ્ચૈર્પ્રિયં ય-
    ત્તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૨॥

અઘરિપુરપિ યત્નાદત્ર દેવ્યાઃ પ્રસાદ-
    પ્રસરકૃતકતાક્ષપ્રાપ્તિકામઃ પ્રકામમ્ ।
અનુસરતિ યદુચ્ચાઇઃ સ્નાનસેવાનુબન્ધૈ-
    સ્તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૩॥

વ્રજભુવનસુધાંશોઃ પ્રેમભૂમિર્નિકામં
    વ્રજમધુરકિશોરીમૌલિરત્નપ્રિયેવ ।
પરિચિતમપિ નામ્ના યા ચ તેનૈવ તસ્યા-
    સ્તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૪॥

અપિ જન ઇહ કશ્ચિદ્યસ્ય સેવાપ્રસાદૈઃ
    પ્રણયસુરલતા સ્યાત્તસ્ય ગોષ્ઠેન્દ્રસૂનોઃ ।
સપદિ કિલ મદીશાદાસ્યપુષ્પપ્રશસ્યા
    તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૫॥

તટમધુરનિકુઞ્જાઃ ક્લૃપ્તનામાન ઉચ્ચૈ-
    ર્નિજપરિજનવર્ગૈઃ સંવિભજ્યાશ્રિતસ્તૈઃ ।

મધુકરરુતરમ્યા યસ્ય રાજન્તિ કામ્યા-
    સ્તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૬॥

તટભુવિ વરવેદ્યાં યસ્ય નર્માતિહૃદ્યાં
    મધુરમધુરવાર્તાં ગોષ્ઠચન્દ્રસ્ય ભઙ્ગ્યા ।
પ્રથયતિ મિથ ઈશા પ્રાણસખ્યાલિભિઃ સા
    તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૭॥

અનુદિનમતિરઙ્ગૈઃ પ્રેમમત્તાલિસઙ્ઘૈ-
    ર્વરસરસિજગન્ધૈર્હારિવારિપ્રપૂર્ણે ।
વિહરત ઇહ યસ્મિન્દમ્પતી તૌ પ્રમત્તૌ
    તદતિસુરભિ રાધાકુણ્ડમેવાશ્રયો મે ॥ ૮॥

અવિકલમતિ દેવ્યાશ્ચારુ કુણ્ડાષ્ટકં યઃ
    પરિપઠતિ તદીયોલ્લાસિદાસ્યાર્પિતાત્મા ।
અચિરમિહ શરીરે દર્શયત્યેવ તસ્મૈ
    મધુરિપુરતિમોદૈઃ શ્લિષ્યમાણાં પ્રિયાં તામ્ ॥ ૯॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        રાધાકુણ્ડાષ્ટકં શ્રીસમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Vilapakusumanjalih ॥ શ્રીવિલાપકુસુમાઞ્જલિઃ ॥

ત્વં રૂપમઞ્જરિ સખિ પ્રથિતા પુરેઽસ્મિ-
ન્પુંસઃ પરસ્ય વદનં ન હિ પશ્યસીતિ ।
બિમ્બાધરે ક્ષતમનાગતભર્તૃકાયા
યત્તે વ્યધાયિ કિમુ તચ્છુકપુઙ્ગવેન ॥ ૧॥ (વસન્ત)
સ્થલકમલિનિ યુક્તં ગર્વિતા કાનનેઽસ્મિ-
ન્પ્રણયસિ વરહાસ્યં પુષ્પગુચ્છચ્છલેન ।
અપિ નિખિલલતાસ્તાઃ સૌરભાક્તાઃ સ મુઞ્ચ-
ન્મૃગયતિ તવ માર્ગં કૃષ્ણભૃઙ્ગો યદદ્ય ॥ ૨॥ (માલિની)
વ્રજેન્દ્રવસતિસ્થલે વિવિધવલ્લવીસઙ્કુલે
ત્વમેવ રતિમઞ્જરિ પ્રચુરપુણ્યપુઞ્જોદયા ।
વિલાસભરવિસ્મૃતપ્રણયિમેખલામાર્ગણે
યદદ્ય નિજનાથયા વ્રજતિ નાથિતા કન્દરમ્ ॥ ૩॥ (પૃથ્વી)
પ્રભુરપિ યદુનન્દનો ચ એષ
પ્રિયયદુનન્દન ઉન્નતપ્રભાવઃ ।
સ્વયમતુલકૃપામૃતાભિષેકં
મમ કૃતવાંસ્તમહં ગુરું પ્રપદ્યે ॥ ૪॥ (પુષ્પિતાગ્રા)
યો માં દુસ્તરગેહનિર્જલમહાકૂપાદપારક્લમા-
ત્સદ્યઃ સાન્દ્રદયામ્બુધિઃ પ્રકૃતિતઃ સ્વૈરી કૃપારજ્જુભિઃ ।
ઉદ્ધૃત્યાત્મસરોજનિન્દિચરણપ્રાન્તં પ્રપાદ્ય સ્વયં
શ્રીદામોદરસાચ્ચકાર તમહં ચૈતન્યચન્દ્રં ભજે ॥ ૫॥ (શાર્દૂલ)
વૈરાગ્યયુગ્ભક્તિરસપ્રયત્નૈ-
રપાયયન્મામનભીપ્સુમન્ધમ્ ।
કૃપામ્બુધિર્યઃ પરદુઃખદુઃખી
સનાતનં તં પ્રભુમાશ્રયામિ ॥ ૬॥ (ઉપજાતિ)

અત્યુત્કટેન નિતરાં વિરહાનલેન
    દન્દહ્યમાનહૃદયા કિલ કાપિ દાસી ।
હા સ્વામિનિ ક્ષણમિહ પ્રણયેન ગાઢ
    આક્રન્દનેન વિધુરા વિલપામિ પદ્યૈઃ ॥ ૭॥ (વસન્ત)
દેવિ દુઃખકુલસાગરોદરે
    દૂયમાનમતિદુર્ગતં જનમ્ ।
ત્વં કૃપાપ્રબલનૌકયાદ્ભુતં
    પ્રાપય સ્વપદપઙ્કજાલયમ્ ॥ ૮॥ (રથોદ્ધતા)
ત્વદલોકનકાલાહિદંશૈરેવ મૃતં જનમ્ ।
ત્વત્પાદાબ્જમિલલ્લાક્ષાભેષજૈર્દેવિ જીવય ॥ ૯॥ (અનુષ્ટુભ્)
દેવિ તે ચરણપદ્મદાસિકાં
    વિપ્રયોગભરદાવપાવકૈઃ ।
દહ્યમાનતરકાયવલ્લરીં
    જીવય ક્ષણનિરીક્ષણામૃતૈઃ ॥ ૧૦॥ (રથોદ્ધતા)
સ્વપ્નેઽપિ કિં સુમુખિ તે ચરણામ્બુજાત
    રાજત્પરાગપટવાસવિભૂષણેન ।
શોભાં પરામતિતરામહહોત્તમાઙ્ગં
    બિભ્રદ્ભવિષ્યતિ કદા મમ સાર્થનામા ॥ ૧૧॥ (વસન્ત)
અમૃતાબ્ધિરસપ્રાયૈસ્તવ નૂપુરસિઞ્જિતૈઃ ।
હા કદા મમ કલ્યાણિ વાધિર્યમપનેષ્યતે ॥ ૧૨॥ (અનુષ્ટુભ્)
શશકભૃદભિસારે નેત્રભૃઙ્ગાઞ્ચલાભ્યાં
    દિશિ વિદિશિ ભયેનોદ્ઘૂર્ણિતાભ્યાં વનાનિ ।
કુવલયદલકોષાણ્યેવ ક્લૃપ્તાનિ યાભ્યાં
    કિમુ કિલ કલનીયો દેવિ તાભ્યાં જનોઽયમ્ ॥ ૧૩॥ (માલિની)
યદવધિ મમ કાચિન્મઞ્જરી રૂપપૂર્વા
    વ્રજભુવિ બત નેત્રદ્વન્દ્વદીપ્તિં ચકાર ।
તદવધિ તવ વૃન્દારણ્યરાજ્ઞિ પ્રકામં
    ચરણકમલલાક્ષાસન્દિદૃક્ષા મમાભૂત્ ॥ ૧૪॥ (માલિની)
યદા તવ સરોવરં સરસભૃઙ્ગસઙ્ઘોલ્લસ-
    ન્સરોરુહકુલોજ્જ્વલં મધુરવારિસમ્પૂરિતમ્ ।
સ્ફુટત્સરસિજાક્ષિ હે નયનયુગ્મસાક્ષાદ્બભૌ
    તદૈવ મમ લાલસાજનિ તવૈવ દાસ્યે રસે ॥ ૧૫॥ (પૃથ્વી)

પાદાબ્જયોસ્તવ વિના વરદાસ્યમેવ
    નાન્યત્કદાપિ સમયે કિલ દેવિ યાચે ।
સખ્યાય તે મમ નમોઽસ્તુ નમોઽસ્તુ નિત્યં
    દાસ્યાસ્ય તે મમ રસોઽસ્તુ રસોઽસ્તુ સત્યમ્ ॥ ૧૬॥ (વસન્ત)
અતિસુલલિતલાક્ષાશ્લિષ્ટસૌભાગ્યમુદ્રા
    તતિભિરધિકતુષ્ટ્યા ચિહ્નિતીકૃત્ય બાહૂ ।
નખદલિતહરિદ્રાગર્વગૌરિ પ્રિયાં મે
    ચરણકમલસેવાં હા કદા દાસ્યસિ ત્વમ્ ॥ ૧૭॥ (માલિની)
પ્રણાલીં કીલાલૈર્બહુભિરભિ સઙ્ક્ષાલ્ય મધુરૈ-
    ર્મુદા સમ્માર્જ્ય સ્વૈર્વિવૃતકચવૃન્દૈઃ પ્રિયતયા ।
કદા બાહ્યાગારં વરપરિમલૈર્ધૂપનિવહૈ-
    ર્વિધાસ્યે તે દેવિ પ્રતિદિનમહો વાસિતમહમ્ ॥ ૧૮॥ (શિખરિણી)
પ્રાતઃ સુધાંશુમિલિતાં મૃદમત્ર યત્ના-
    દાહૃત્ય વાસિતપયશ્ચ ગૃહાન્તરે ચ ।
પાદામ્બુજે બત કદા જલધારયા તે
    પ્રક્ષાલ્ય ભાવિનિ કચૈરિહ માર્જયામિ ॥ ૧૯॥ (વસન્ત)
પ્રક્ષાલ્ય પાદકમલં કૃતદાન્તકાષ્ઠાં
    સ્નાનાર્થમન્યસદને ભવતીં નિવિષ્ટામ્ ।
અભ્યજ્ય ગન્ધિતતરૈરિહ તૈલપૂરૈઃ
    પ્રોદ્વર્તયિષ્યતિ કદા કિમુ કિઙ્કરીયમ્ ॥ ૨૦॥ (વસન્ત)
અયિ વિમલજલાનાં ગન્ધકર્પૂરપુષ્પૈ-
    ર્જિતવિધુમુખપદ્મે વાસિતાનાં ઘટૌઘૈઃ ।
પ્રણયલલિતસખ્યા દીયમાનૈઃ પુરસ્તા-
    ત્તવ વરમભિષેકં હા કદાહં કરિષ્યે ॥ ૨૧॥ (માલિની)
પાનીયં ચીનવસ્ત્રૈઃ શશિમુખિ શનકૈ રમ્યમૃદ્વઙ્ગયષ્ટે-
    ર્યત્નાદુત્સાર્ય મોદાદ્દિશિ દિશિ વિચલન્નેત્રમીનાઞ્ચલાયાઃ ।
શ્રોણૌ રક્તં દુકૂલં તદપરમતુલં ચારુનીલં શિરોઽગ્રા-
    ત્સર્વાઙ્ગેષુ પ્રમોદાત્પુલકિતવપુષા કિં મયા તે પ્રયોજ્યમ્ ॥ ૨૨॥ (સ્રગ્ધરા)
પ્રક્ષાલ્ય પાદકમલં તદનુક્રમેણ
    ગોષ્ઠેન્દ્રસૂનુદયિતે તવ કેશપાશમ્ ।
હા નર્મદાગ્રથિતસુન્દરસૂક્ષ્મમાલ્યૈ-
    ર્વેણીં કરિષ્યતિ કદા પ્રણયૈર્જનોઽયમ્ ॥ ૨૩॥ (વસન્ત)

સુભગમૃગમદેનાખણ્ડશુભ્રાંશુવત્તે
    તિલકમિહ લલાટે દેવિ મોદાદ્વિધાય ।
મસૃણઘુસૃણચર્ચામર્પયિત્વા ચ ગાત્રે
    સ્તનયુગમપિ ગન્ધૈશ્ચિત્રિતં કિં કરિષ્યે ॥ ૨૪॥ (માલિની)
સિન્દૂરરેખા સીમન્તે દેવિ રત્નશલાકયા ।
મયા યા કલ્પિતા કિં તે સાલકાઞ્છોભયિષ્યતિ ॥ ૨૫॥ (અનુષ્ટુભ્)
હન્ત દેવિ તિલકસ્ય સમન્તા-
    દ્બિન્દવોઽરુણસુગન્ધિરસેન ।
કૃષ્ણમાદનમહૌષધિમુખ્યા
    ધીરહસ્તમિહ કિં પરિકલ્પ્યાઃ ॥ ૨૬॥ (સ્વાગતા)
ગોષ્ઠેન્દ્રપુત્રમદચિત્તકરીન્દ્રરાજ
    બન્ધાય પુષ્પધનુષઃ કિલ બદ્ધરજ્જ્વોઃ ।
કિં કર્ણયોસ્તવ વરોરુ વરાવતંસ
    યુગ્મેન ભૂષણમહં સુખિતા કરિષ્યે ॥ ૨૭॥ (વસન્ત)
યા તે કઞ્ચુલિરત્ર સુન્દરિ મયા વક્ષોજયોરર્પિતા
    શ્યામાચ્છાદનકામ્યયા કિલ ન સાસત્યેતિ વિજ્ઞાયતામ્ ।
કિન્તુ સ્વામિનિ કૃષ્ણ એવ સહસા તત્તામવાપ્ય સ્વયં
    પ્રાણેભ્યોઽપ્યધિકં સ્વકં નિધિયુગં સઙ્ગોપયત્યેવ હિ ॥ ૨૮॥ (શાર્દૂલ)
નાનામણિપ્રકરગુમ્ફિતચારુપુષ્ટા
    મુક્તાસ્રજસ્તવ સુવક્ષસિ હેમગૌરિ ।
શ્રાન્ત્યાભૃતાલસમુકુન્દસુતૂલિકાયાં
    કિં કલ્પયિષ્યતિતરાં તવ દાસિકેયમ્ ॥ ૨૯॥ (વસન્ત)
મણિચયખચિતાભિર્નીલચૂડાવલીભિ-
    ર્હરિદયિતકલાવિદ્વન્દ્વમિન્દીવરાક્ષિ ।
અપિ બત તવ દિવ્યૈરઙ્ગુલીરઙ્ગુલીયૈઃ
    ક્વચિદપિ કિલ કાલે ભૂષયિષ્યામિ કિં નુ ॥ ૩૦॥ (માલિની)
પાદામ્ભોજે મણિમયતુલાકોટિયુગ્મેન યત્ના-
    દભ્યર્ચે તદ્દલકુલમપિ પ્રેષ્ટપાદાઙ્ગુલીયૈઃ ।
કાઞ્ચીદામ્ના કટિતટમિદં પ્રેમપીઠં સુનેત્રે
    કંસારાતેરતુલમચિરાદર્ચયિષ્યામિ કિં તે ॥ ૩૧॥ (મન્દાક્રાન્તા)
લલિતતરમૃણાલીકલ્પબાહુદ્વયં તે
    મુરજયિમતિહંસીધૈર્યવિધ્વંસદક્ષમ્ ।

મણિકુલરચિતાભ્યામઙ્ગદાભ્યાં પુરસ્તા-
    ત્પ્રમદભરવિનમ્રા કલ્પયિષ્યામિ કિં વા ॥ ૩૨॥ (માલિની)
રાસોત્સવે ય ઇહ ગોકુલચન્દ્રબાહુ
    સ્પર્શેન સૌભગભરં નિતરામવાપ ।
ગ્રૈવેયકેણ કિં તં તવ કણ્ઠદેશં
    સમ્પૂજયિષ્યતિ પુનઃ સુભગે જનોઽયમ્ ॥ ૩૩॥ (વસન્ત)
દત્તઃ પ્રલમ્બરિપુણોદ્ભટશઙ્ખચૂડ
    નાશાત્પ્રતોષિ હૃદયં મધુમઙ્ગલસ્ય ।
હસ્તેન યઃ સુમુખિ કૌસ્તુભમિત્રમેતં
    કિં તે સ્યમન્તકમણિં તરલં કરિષ્યે ॥ ૩૪॥ (વસન્ત)
પ્રાન્તદ્વયે પરિવિરાજિતગુચ્છયુગ્મ
    વિભ્રાજિતેન નવકાઞ્ચનડોરકેણ ।
ક્ષીણં ત્રુટત્યથ કૃશોદરિ ચેદિતીવ
    બધ્નામિ ભોસ્તવ કદાતિભયેન મધ્યમ્ ॥ ૩૫॥ (વસન્ત)
કનકગુણિતમુચ્ચૈર્મૌક્તિકં મત્કરાત્તે
    તિલકકુસુમવિજેત્રી નાસિકા સા સુવૃત્તમ્ ।
મધુમથનમહાલિક્ષોભકં હેમગૌરિ
    પ્રકટતરમરન્દપ્રાયમાદાસ્યતે કિમ્ ॥ ૩૬॥ (માલિની)
અઙ્ગદેન તવ વામદોઃસ્થલે
    સ્વર્ણગૌરિ નવરત્નમાલિકામ્ ।
પટ્ટગુચ્છપરિશોભિતામિમાં
    આજ્ઞયા પરિણયામિ તે કદા ॥ ૩૭॥ (રથોદ્ધતા)
કર્ણયોરુપરિ ચક્રશલાકે
    ચઞ્ચલાક્ષિ નિહિતે મયકા તે ।
ક્ષોભકં નિખિલગોપવધૂનાં
    ચક્રવદ્ભ્રમયતાં મુરશત્રુમ્ ॥ ૩૮॥

કદા તે મૃગશાવાક્ષિ
    ચિબુકે મૃગનાભિના ।
બિન્દુમુલ્લાસયિષ્યામિ
    મુકુન્દામોદમન્દિરે ॥ ૩૯॥ (અનુષ્ટુભ્)
દશનાંસ્તે કદા રક્ત

    રેખાભિર્ભૂષયામ્યહમ્ ।
દેવિ મુક્તાફલાનીહ
    પદ્મરાગગુણૈરિહ ॥ ૪૦॥ (અનુષ્ટુભ્)
ઉત્ખાદિરેણ નવચન્દ્રવિરાજિતેન
    રાગેણ તે વરસુધાધરબિમ્બયુગ્મે ।
ગાઙ્ગેયગાત્રિ મયકા પરિરઞ્જિતેઽસ્મિ-
    ન્દંશં વિધાસ્યતિ હઠાત્કિમુ કૃષ્ણકીરઃ ॥ ૪૧॥ (વસન્તતિલક)
યત્પ્રાન્તદેશલવલેશવિઘૂર્ણિતેન
    બદ્ધઃ ક્ષણાદ્ભવતિ કૃષ્ણકરીન્દ્ર ઉચ્ચૈઃ ।
તત્ખઞ્જરીટજયિનેત્રયુગં કદાયં
    સમ્પૂજયિષ્યતિ જનસ્તવ કજ્જલેન ॥ ૪૨॥ (વસન્ત)
યસ્યાઙ્કુરઞ્જિતશિરાસ્તવ માનભઙ્ગે
    ગોષ્ઠેન્દ્રસૂનુરધિકાં સુષમામુપૈતિ ।
લાક્ષારસં સ ચ કદા પદયોરધસ્તે
    ન્યસ્તો મયાપ્યતિતરાં છવિમાપ્સ્યતીહ ॥ ૪૩॥ (વસન્ત)
કલાવતિ નતાંસયોઃ પ્રચુરકામપુઞ્જોજ્જ્વલ-
    ત્કલાનિધિમુરદ્વિષઃ પ્રકટરાસસમ્ભાવયોઃ ।
ભ્રમદ્ભ્રમરઝઙ્કૃતૈર્મધુરમલ્લિમાલાં મુદા
    કદા તવ તયોઃ સમર્પયતિ દેવિ દાસીજનઃ ॥ ૪૪॥

સૂર્યાય સૂર્યમણિનિર્મિતવેદિમધ્યે
    મુગ્ધાઙ્ગિ ભાવત ઇહાલિકુલૈર્વૃતાયાઃ ।
અર્ઘં સમર્પયિતુમુત્કધિયસ્તવારા-
    ત્સજ્જાનિ કિં સુમુખિ દાસ્યતિ દાસિકેયમ્ ॥ ૪૫॥

વ્રજપુરપતિરાજ્ઞ્યા આજ્ઞયા મિષ્ટમન્નં
    બહુવિધમતિયત્નાત્સ્વેન પક્વં વરોરુ ।
સપદિ નિજસખીનાં મદ્વિધાનાં ચ હસ્તૈ-
    ર્મધુમથનનિમિત્તં કિં ત્વયા સન્નિધાસ્યમ્ ॥ ૪૬॥

નીતાન્નમદ્વિધલલાટતટે લલાટં
    પ્રીત્યા પ્રદાય મુદિતા વ્રજરાજરાજ્ઞી ।
પ્રેમ્ણા પ્રસૂરિવ ભવત્કુશલસ્ય પૃચ્છાં
    ભવ્યે વિધાસ્યતિ કદા મયિ તાવકત્વાત્ ॥ ૪૭॥

કૃષ્ણવક્ત્રામ્બુજોચ્છિષ્ટં
    પ્રસાદં પરમાદરાત્ ।
દત્તં ધનિષ્ઠયા દેવિ
    કિમાનેષ્યામિ તેઽગ્રતઃ ॥ ૪૮॥ (અનુષ્ટુભ્)
નાનાવિધૈરમૃતસારરસાયનૈસ્તૈઃ
    કૃષ્ણપ્રસાદમિલિતૈરિહ ભોજ્યપેયૈઃ ।
હા કુઙ્કુમાઙ્ગિ લલિતાદિસખીવૃતા ત્વં
    યત્નાન્મયા કિમુત્તરામુપભોજનીયા ॥ ૪૯॥ (વસન્ત)
પાનાય વારિ મધુરં નવપાટલાદિ
    કર્પૂરવાસિતતરં તરલાક્ષિ દત્ત્વા ।
કાલે કદા તવ મયાચમનીયદન્ત
    કાષ્ઠાદિકં પ્રણયતઃ પરમર્પણીયમ્ ॥ ૫૦॥ (વસન્ત)
(યુગ્મકમ્)
ભોજનસ્ય સમયે તવ યત્ના-
ત્દેવિ ધૂપનિવહાન્વરગન્ધાન્।
બીજનાદ્યમપિ તત્ક્ષણયોગ્યં
હા કદા પ્રણયતઃ પ્રણયામિ ॥ ૫૧॥ (સ્વાગતા)
કર્પૂરપૂરપરિપૂરિતનાગવલ્લી
    પર્ણાદિપૂગપરિકલ્પિતવીટિકાં તે ।
વક્ત્રામ્બુજે મધુરગાત્રિ મુદા કદાહં
    પ્રોત્ફુલ્લરોમનિકરૈઃ પરમર્પયામિ ॥ ૫૨॥ (વસન્ત)
આરાત્રિકેણ ભવતીં કિમુ દેવિ દેવીં
    નિર્મઞ્છયિષ્યતિતરાં લલિતા પ્રમોદાત્ ।
અન્યાલયશ્ચ નવમઙ્ગલગાનપુષ્પૈઃ
    પ્રાણાર્બુદૈરપિ કચૈરપિ દાસિકેયમ્ ॥ ૫૩॥

આલીકુલેન લલિતાપ્રમુખેન સાર્ધં
    આતન્વતી ત્વમિહ નિર્ભરમર્મગોષ્ઠીમ્ ।
મત્પાણિકલ્પિતમનોહરકેલિતલ્પં
    આભૂષયિષ્યસિ કદા સ્વપનેન દેવિ ॥ ૫૪॥

સંવાહયિષ્યતિ પદૌ તવ કિઙ્કરીયં

હા રૂપમઞ્જરિરસૌ ચ કરામ્બુજે દ્વે ।
યસ્મિન્મનોજ્ઞહૃદયે સદયેઽનયોઃ કિં
શ્રીમાન્ભવિષ્યતિતરાં શુભવાસરઃ સઃ ॥ ૫૫ ॥

તવોદ્ગીર્ણં ભોજ્યં સુમુખિ કિલ કલ્લોલસલિલં
તથા પાદામ્ભોજામૃતમિહ મયા ભક્તિલતયા ।
અયિ પ્રેમ્ણા સાર્ધં પ્રણયિજનવર્ગૈર્બહુવિધૈ-
રહો લબ્ધવ્યં કિં પ્રચુરતરભોગ્યોદયબલૈઃ ॥ ૫૬ ॥

ભોજનાવસરે દેવિ
સ્નેહેન સ્વમુખામ્બુજાત્ ।
મહ્યં ત્વદ્ગતચિત્તાયૈ
કિં સુધાસ્ત્વં પ્રદાસ્યસિ ॥ ૫૭ ॥ (અનુષ્ટુભ્)
અપિ બત રસવત્યાઃ સિદ્ધયે માધવસ્ય
વ્રજપતિપુરમુદ્યદ્રોમરોમા વ્રજન્તી ।
સ્ખલિતગતિરુદઞ્ચત્સ્વાન્તસૌખ્યેન કિં મે
ક્વચિદપિ નયનાભ્યાં લપ્સ્યસે સ્વામિનિ ત્વમ્ ॥ ૫૮ ॥ (માલિની)
પાર્શ્વદ્વયે લલિતયાથ વિશાખયા ચ
ત્વાં સર્વતઃ પરિજનૈશ્ચ પરૈઃ પરીતામ્ ।
પશ્ચાન્મયા વિભૃતભઙ્ગુરમધ્યભાગાં
કિં રૂપમઞ્જરિરિયં પથિ નેષ્યતીહ ॥ ૫૯ ॥

હમ્બારવૈરિહ ગવામપિ બલ્લવાનાં
કોલાહલૈર્વિવિધવન્દિકલાવતાં તૈઃ ।
સમ્ભ્રાજતે પ્રિયતયા વ્રજરાજસૂનો-
ર્ગોવર્ધનાદપિ ગુરુર્વ્રજવન્દિતાદ્યઃ ॥ ૬૦ ॥

પ્રાપ્તાં નિજપ્રણયિનીપ્રકરૈઃ પરીતાં
નન્દીશ્વરં વ્રજમહેન્દ્રમહાલયં તમ્ ।
દૂરે નિરીક્ષ્ય મુદિતા ત્વરિતં ધનિષ્ઠા
ત્વામાનયિષ્યતિ કદા પ્રણયૈર્મમાગ્રે ॥ ૬૧ ॥

(યુગ્મકમ્)
પ્રક્ષાલ્ય પાદકમલે કુશલે પ્રવિષ્ટા
નત્વા વ્રજેશમહિષીપ્રભૃતીર્ગુરૂસ્તાઃ ।

હા કુર્વતી રસવતીં રસભાક્કદા ત્વં
    સમ્મજ્જયિષ્યસિતરાં સુખસાગરે મામ્ ॥ ૬૨॥

માધવાય નતવક્ત્રમાદૃતા
    ભોજ્યપેયરસસઞ્ચયં ક્રમાત્ ।
તન્વતી ત્વમિહ રોહિણીકરે
    દેવિ ફુલ્લવદનં કદેક્ષ્યસે ॥ ૬૩॥

ભોજને ગુરુસભાસુ કથઞ્ચિ-
    ન્માધવેન નતદૃષ્ટિ મુદોત્કમ્ ।
વીક્ષ્યમાણમિહ તે મુખપદ્મં
    મોદયિષ્યસિ કદા મધુરે મામ્ ॥ ૬૪॥

અયિ વિપિનમટન્તં સૌરભેયીકુલાનાં
    વ્રજનૃપતિકુમારં રક્ષણે દીક્ષિતં તમ્ ।
વિકલમતિજનન્યા લાલ્યમાનં કદા ત્વં
    સ્મિતમધુરકપોલં વીક્ષ્યસે વીક્ષ્યમાણા ॥ ૬૫॥

ગોષ્ઠેશયાથ કુતુકાચ્છપથાદિપૂર્વં
    સુસ્નિગ્ધયા સુમુખિ માતૃપરાર્ધતોઽપિ ।
હા હ્રીમતિ પ્રિયગણૈઃ સહ ભોજ્યમાનાં
    કિં ત્વાં નિરીક્ષ્ય હૃદયે મુદમદ્ય લપ્સ્યે ॥ ૬૬॥

આલિઙ્ગનેન શિરસઃ પરિચુમ્બનેન
    સ્નેહાવલોકનભરેણ ચ ખઞ્જનાક્ષિ ।
ગોષ્ઠેશયા નવવધૂમિવ લાલ્યમાનાં
    ત્વાં પ્રેક્ષ્ય કિં હૃદિ મહોત્સવમાતનિષ્યે ॥ ૬૭॥

હા રૂપમઞ્જરિ સખિ પ્રણયેન દેવીં
    ત્વદ્બાહુદત્તભુજવલ્લરિમાયતાક્ષીમ્ ।
પશ્ચાદહં કલિતકામતરઙ્ગરઙ્ગાં
    નેષ્યામિ કિં હરિવિભૂષિતકેલિકુઞ્જમ્ ॥ ૬૮॥

સાકં ત્વયા સખિ નિકુઞ્જગૃહે સરસ્યાઃ
    સ્વસ્યાસ્તટે કુસુમભાવિતભૂષણેન ।
શૃઙ્ગારિતં વિદધતી પ્રિયમીશ્વરી સા
    હા હા ભવિષ્યતિ મદીક્ષણગોચરઃ કિમ્ ॥ ૬૯॥

શ્રુત્વા વિચક્ષણમુખાદ્વ્રજરાજસૂનોઃ
    શસ્તાભિસારસમયં સુભગેऽત્ર હૃષ્ટા ।
સૂક્ષ્મામ્બરૈઃ કુસુમસંસ્કૃતકર્ણપૂર
    હારાદિભિશ્ચ ભવતીં કિમલઙ્કરિષ્યે ॥ ૭૦॥

નાનાપુષ્પૈઃ ક્વણિતમધુપૈર્દેવિ સમ્ભાવિતાભિ-
    ર્માલાભિસ્તદ્ગુસૃણવિલસત્કામચિત્રાલિભિશ્ચ ।
રાજદ્વારે સપદિ મદનાનન્દદાભિખ્યગેહે
    મલ્લીજાલૈઃ શશિમુખિ કદા તલ્પમાકલ્પયિષ્યે ॥ ૭૧॥

શ્રીરૂપમઞ્જરિકરાર્ચિતપાદપદ્મ
    ગોષ્ઠેન્દ્રનન્દનભુજાર્પિતમસ્તકાયાઃ ।
હા મોદતઃ કનકગૌરિ પદારવિન્દ
    સંવાહનાનિ શનકૈસ્તવ કિં કરિષ્યે ॥ ૭૨॥

ગોવર્ધનાદ્રિનિકટે મુકુટેન નર્મ
    લીલાવિદગ્ધશિરસાં મધુસૂદનેન ।
દાનચ્છલેન ભવતીમવરુધ્યમાનાં
    દ્રક્ષ્યામિ કિં ભ્રૂકુટિદર્પિતનેત્રયુગ્મામ્ ॥ ૭૩॥

તવ તનુવરગન્ધાસઙ્ગિવાતેન ચન્દ્રા
    વલિકરકૃતમલ્લીકેલિતલ્પાચ્છલેન ।
મધુરમુખિ મુકુન્દં કુણ્ડતીરે મિલન્તં
    મધુપમિવ કદાહં વીક્ષ્ય દર્પં કરિષ્યે ॥ ૭૪॥

સમન્તાદુન્મત્તભ્રમરકુલઝઙ્કારનિકરૈ-
    ર્લસત્પદ્મસ્તોમૈરપિ વિહગરાવૈરપિ પરમ્ ।
સખીવૃન્દૈઃ સ્વીયૈઃ સરસિ મધુરે પ્રાણપતિના
    કદા દ્રક્ષ્યામસ્તે શશિમુખિ નવં કેલિનિવહમ્ ॥ ૭૫॥

સરોવરલસત્તટે મધુપગુઞ્જિકુઞ્જાન્તરે
    સ્ફુટત્કુસુમસઙ્કુલે વિવિધપુષ્પસઙ્ઘૈર્મુદા ।
અરિષ્ટજયિના કદા તવ વરોરુ ભૂષાવિધિ-
    ર્વિધાસ્યત ઇહ પ્રિયં મમ સુખાબ્ધિમાતન્વતા ॥ ૭૬॥

સ્ફીતસ્વાન્તં કયાચિત્સરભસમચિરેણાર્પ્યમાણૈર્દરોદ્ય-

નાનાપુષ્પોરુગુઞ્જાફલનિકરલસત્કેકિપિઞ્છપ્રપઞ્ચૈઃ ।
સોત્કમ્પં રચ્યમાનઃ કૃતરુચિહરિણોત્ફુલ્લમઙ્ગં વહન્ત્યાઃ
સ્વામિન્યાઃ કેશપાશઃ કિમુ મમ નયનાનન્દમુચ્ચૈર્વિધાતા ॥ ૭૭॥

માધવં મદનકેલિવિભ્રમે
મત્તયા સરસિજેન ભવત્યા ।
તાડિતં સુમુખિ વીક્ષ્ય કિન્ત્વિયં
ગૂઢહાસ્યવદના ભવિષ્યતિ ॥ ૭૮॥

સુલલિતનિજબાહ્વાશ્લિષ્ટગોષ્ઠેન્દ્રસૂનોઃ
સુવલિતતરબાહ્વાશ્લેષદીવ્યન્નતાંસા ।
મધુરમદનગાનં તન્વતી તેન સાર્ધં
સુભગમુખિ મુદં મે હા કદા દાસ્યસિ ત્વમ્ ॥ ૭૯॥

જિત્વા પાશકખેલાયાં આચ્છિદ્ય મુરલીં હરેઃ ।
ક્ષિપ્તાં મયિ ત્વયા દેવિ ગોપયિષ્યામિ તાં કદા ॥ ૮૦॥

અપિ સુમુખિ કદાહં માલતીકેલિતલ્પે
મધુરમધુરગોષ્ઠીં બિભ્રતીં વલ્લભેન ।
મનસિજસુખદેઽસ્મિન્મન્દિરે સ્મેરગણ્ડાં
સપુલકતનુરેષા ત્વાં કદા બીજયામિ ॥ ૮૧॥

આયાતોદ્યત્કમલવદને હન્ત લીલાભિસારા-
દ્રત્યાટોપૈઃ શ્રમવિલુલિતં દેવિ પાદાબ્જયુગ્મમ્ ।
સ્નેહાત્સંવાહયિતુમપિ હ્રીપુઞ્જમૂર્તેઽપ્યલજ્જં
નામગ્રાહં નિજજનમિમં હા કદા નોત્સ્યસિ ત્વમ્ ॥ ૮૨॥

હા નપ્ત્રિ રાધે તવ સૂર્યભક્તેઃ
કાલઃ સમુત્પન્ન ઇતઃ કુતોઽસિ ।
ઇતીવ રોષાન્મુખરા લપન્તી
સુધેવ કિં માં સુખયિષ્યતીહ ॥ ૮૩॥

દેવિ ભાષિતપીયૂષં સ્મિતકર્પૂરવાસિતમ્ ।
શ્રોત્રાભ્યાં નયનાભ્યાં તે કિં નુ સેવિષ્યતે મયા ॥ ૮૪॥

કુસુમચયનખેલાં કુર્વતી ત્વં પરીતા
રસકુટિલસખીભિઃ પ્રાણનાથેન સાર્ધમ્ ।

કપટકલહકેલ્યા ક્વાપિ રોષેણ ભિન્ના
    મમ મુદમતિબેલં ધાસ્યસે સુવ્રતે કિમ્ ॥ ૮૫॥

નાનાવિધૈઃ પૃથુલકાકુભરૈરસહ્યૈઃ
    સંપ્રાર્થિતઃ પ્રિયતયા બત માધવેન ।
ત્વન્માનભઙ્ગવિધયે સદયે જનોઽયં
    વ્યગ્રઃ પતિષ્યતિ કદા લલિતાપદાન્તે ॥ ૮૬॥

પ્રીત્યા મઙ્ગલગીતનૃત્યવિલસદ્વીણાદિવાદ્યોત્સવૈઃ
    શુદ્ધાનાં પયસાં ઘટૈર્બહુવિધૈઃ સંવાસિતાનાં ભૃશમ્ ।
વૃન્દારણ્યમહાધિપત્યવિધયે યઃ પૌર્ણમાસ્યા સ્વયં
    ધીરે સંવિહિતઃ સ કિં તવ મહાસેકો મયા દ્રક્ષ્યતે ॥ ૮૭॥

ભ્રાત્રા ગોયુતમત્ર મઞ્જુવદને સ્નેહેન દત્ત્વાલયં
    શ્રીદામ્ના કૃપણાં પ્રતોષ્ય જટિલાં રક્ષાખ્યરાકાક્ષણે ।
નીતાયાઃ સુખશોકરોદનભરૈસ્તે સન્દ્રવન્ત્યાઃ પરં
    વાત્સલ્યાજ્જનકૌ વિધાસ્યત ઇતઃ કિં લાલનાં મેઽગ્રતઃ ॥ ૮૮॥

લજ્જયાલિપુરતઃ પરતો માં
    ગહ્વરં ગિરિપતેર્બત નીત્વા ।
દિવ્યગાનમપિ તત્સ્વરભેદં
    શિક્ષયિષ્યસિ કદા સદયે ત્વમ્ ॥ ૮૯॥

યાચિતા લલિતયા કિલ દેવ્યા
    લજ્જયા નતમુખીં ગણતો મામ્ ।
દેવિ દિવ્યરસકાવ્યકદમ્બં
    પાઠયિષ્યસિ કદા પ્રણયેન ॥ ૯૦॥

નિજકુણ્ડતટિકુઞ્જે ગુઞ્જદ્ભ્રમરસઙ્કુલે ।
દેવિ ત્વં કચ્છપિશિક્ષાં કદા માં કારયિષ્યસિ ॥ ૯૧॥

વિહારૈસ્ત્રુટિતં હારં ગુમ્ફિતું દયિતં કદા ।
સખીનાં લજ્જયા દેવિ સંજ્ઞયા માં નિદેક્ષ્યસિ ॥ ૯૨॥

સ્વમુખાન્મન્મુખે દેવિ કદા તામ્બૂલચર્વિતમ્ ।
સ્નેહાત્સર્વદિશો વીક્ષ્ય સમયે ત્વં પ્રદાસ્યસિ ॥ ૯૩॥

નિવિડમદનયુદ્ધે પ્રાણનાથેન સાર્ધં

દયિતમધુરકાઞ્ચી યા મદાદ્વિસ્મૃતાસીત્ ।
શશિમુખિ સમયે તાં હન્ત સમ્ભાલ્ય ભઙ્ગ્યા
ત્વરિતમિહ તદર્થં કિં ત્વયાહં પ્રહેયા ॥ ૯૪॥

કેનાપિ દોષલવમાત્રલવેન દેવિ
સન્તાડ્યમાન ઇહ ધીરમતે ત્વયોચ્ચૈઃ ।
રોષેણ તલ્લલિતયા કિલ નીયમાનઃ
સન્દ્રક્ષ્યતે કિમુ મનાક્સદરં જનોઽયમ્ ॥ ૯૫॥

તવૈવાસ્મિ તવૈવાસ્મિ ન જીવામિ ત્વયા વિના ।
ઇતિ વિજ્ઞાય દેવિ ત્વં નય માં ચરણાન્તિકે ॥ ૯૬॥

સ્વકુણ્ડં તવ લોલાક્ષિ સપ્રિયાયાઃ સદાસ્પદમ્ ।
અત્રૈવ મમ સંવાસ ઇહૈવ મમ સંસ્થિતિઃ ॥ ૯૭॥

હે શ્રીસરોવર સદા ત્વયિ સા મદીશા
પ્રેષ્ઠેન સાર્ધમિહ ખેલતિ કામરઙ્ગૈઃ ।
ત્વં ચેત્પ્રિયાત્પ્રિયમતીવ તયોરિતીમાં
હા દર્શયાદ્ય કૃપયા મમ જીવિતં તામ્ ॥ ૯૮॥

ક્ષણમપિ તવ સઙ્ગં ન ત્યજેદેવ દેવી
ત્વમસિ સમવયસ્ત્વાન્નર્મભૂમિર્યદસ્યાઃ ।
ઇતિ સુમુખિ વિશાખે દર્શયિત્વા મદીશાં
મમ વિરહહતાયાઃ પ્રાણરક્ષાં કુરુષ્વ ॥ ૯૯॥

હા નાથ ગોકુલસુધાકર સુપ્રસન્ન
વક્ત્રારવિન્દ મધુરસ્મિત હે કૃપાર્દ્ર ।
યત્ર ત્વયા વિહરતે પ્રણયૈઃ પ્રિયારા-
ત્તત્રૈવ મામપિ નય પ્રિયસેવનાય ॥ ૧૦૦॥

લક્ષ્મીર્યદઙ્ઘ્રિકમલસ્ય નખાઞ્ચલસ્ય
સૌન્દર્યબિન્દુમપિ નાર્હતિ લબ્ધુમીશે ।
સા ત્વં વિધાસ્યસિ ન ચેન્મમ નેત્રદાનં
કિં જીવિતેન મમ દુઃખદવાગ્નિદેન ॥ ૧૦૧॥

આશાભરૈરમૃતસિન્ધુમયૈઃ કથઞ્ચિ-
ત્કાલો મયાતિગમિતઃ કિલ સામ્પ્રતં હિ ।

ત્વં ચેત્કૃપાં મયિ વિધાસ્યસિ નૈવ કિં મે
    પ્રાણૈર્વ્રજેન ચ વરોરુ બકારિણાપિ ॥ ૧૦૨॥

ત્વં ચેત્કૃપામયિ કૃપાં મયિ દુઃખિતાયાં
    નૈવાતનોરતિતરાં કિમિહ પ્રલાપૈઃ ।
ત્વત્કુણ્ડમધ્યમપિ તદ્બહુકાલમેવ
    સંસેવ્યમાનમપિ કિં નુ કરિષ્યતીહ ॥ ૧૦૩॥

અયિ પ્રણયશાલિનિ પ્રણયપુષ્ટદાસ્યાપ્તયે
    પ્રકામમતિરોદનૈઃ પ્રચુરદુઃખદગ્ધાત્મના ।
વિલાપકુસુમાઞ્જલિર્હૃદિ નિધાય પાદામ્બુજે
    મયા બત સમર્પિતસ્તવ તનોતુ તુષ્ટિં મનાક્ ॥ ૧૦૪॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીશ્રીવિલાપકુસુમાઞ્જલિઃ સમ્પૂર્ણા ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Vrajavilasastava ॥ વ્રજવિલાસસ્તવ ॥

શ્રીશ્રીરાધાકૃષ્ણપાદામ્બુજેભ્યો નમઃ ।

પ્રતિષ્ઠા રજ્જૂભિર્બદ્ધં
    કામાદ્યૈર્વર્ત્મપાતિભિઃ ।
છિત્ત્વા તાઃ સંહરન્તસ્તા
    નઘારેઃ પાન્તુ માં ભટાઃ ॥ ૧॥

દગ્ધં વાર્ધકવન્યવહ્નિભિરલં દષ્ટં દુરાન્ધ્યાહિના
    બિદ્ધં મામતિપારવશ્યવિશિખૈઃ ક્રોધાદિસિંહૈર્વૃતમ્ ।
સ્વામિન્પ્રેમસુધાદ્રવં કરુણયા દ્રાક્પાયય શ્રીહરે
    યેનૈતાનવધીર્ય સન્તતમહં ધીરો ભવન્તં ભજે ॥ ૨॥

યન્માધુરી દિવ્યસુધારસાબ્ધેઃ
    સ્મૃતેઃ કણેનાપ્યતિલોલિતાત્મા ।
પદ્મૈર્વ્રજસ્થાનખિલાન્વ્રજં ચ
    નત્વા સ્વનાથૌ બત તૌ દિદૃક્ષે ॥ ૩॥

પ્રાદુર્ભાવસુધાદ્રવેણ નિતરામઙ્ગિત્વમાપ્વા યયો-
    ર્ગોષ્ઠેऽતીક્ષ્ણમનઙ્ગ એષ પરિતઃ ક્રીડાવિનોદં રસૈઃ ।
પ્રીત્યોલ્લાસયતીહ મુગ્ધમિથુનશ્રેણીવતંસાવિમૌ
    ગાન્ધર્વા ગિરિધારિણૌ બત કદા દ્રક્ષ્યામિ રાગેણ તૌ ॥ ૪॥

વૈકુણ્ઠાદપિ સોદરાત્મજવૃતા દ્વારવતી સા પ્રિયા
    યત્ર શ્રીશતનિન્દિપટ્ટમહિષીવૃન્દૈઃ પ્રભુઃ ખેલતિ ।
પ્રેમક્ષેત્રમસૌ તતોऽપિ મથુરા શ્રેષ્ઠા હરેર્જન્મતો
    યત્ર શ્રીવ્રજ એવ રાજતિતરાં તામેવ નિત્યં ભજે ॥ ૫॥

યત્ર ક્રીડતિ માધવઃ પ્રિયતમૈઃ સ્નિગ્ધઃ સખીનાં કુલૈ-

ર્નિત્યં ગાઢરસેન રામસહિતોઽપ્યદ્યાપિ ગોચારણૈઃ ।
યસ્યાપ્યદ્ભુતમાધુરીરસવિદાં હૃદ્યેવ કાપિ સ્ફુરે-
ત્પ્રેષ્ઠં તન્મથુરાપુરાદપિ હરેર્ગોષ્ઠં તદેવાશ્રયે ॥ ૬॥

વૈદગ્ધ્યોત્તરનર્મકર્મઠસખીવૃન્દૈઃ પરીતં રસૈઃ
પ્રત્યેકં તરુકુઞ્જવલ્લરિગિરિદ્રોણીષુ રાત્રિન્દિવમ્ । ?
નાનાકેલિભરેણ યત્ર રમતે તન્નવ્યયૂનોર્યુગં
તત્પાદામ્બુજગન્ધબન્ધુરતરં વૃન્દાવનં તદ્ભજે ॥ ૭॥

યત્ર શ્રીઃ પરિતો ભ્રમત્યવિરતં તાસ્તા મહાસિદ્ધયઃ
સ્ફીતાઃ સૃષ્ટિરલં ગવામુદયની વાસોઽપિ ગોષ્ઠૌકસામ્ ।
વાત્સલ્યાત્પરિપાલિતો વિહરતે કૃષ્ણઃ પિતૃભ્યાં સુખૈ
સ્તન્નાન્દીશ્વરમાલયં વ્રજપતેર્ગોષ્ઠોત્તમાઙ્ગં ભજે ॥ ૮॥

પુત્રસ્યાભ્યુદયાર્થમાદરભરૈર્મિષ્ટાન્નપાનોત્કરૈ-
ર્દિવ્યાનાં ચ ગવાં મણિવ્રજયુષાં દાનૈરિહ પ્રત્યહમ્ ।
યો વિપ્રાન્ગણશઃ પ્રતોષયતિ તદ્ભવ્યસ્ય વાર્તાં મુહુઃ
સ્નેહાત્પૃચ્છતિ યશ્ચ તદ્ગતમનાસ્તં ગોકુલેન્દ્રં ભજે ॥ ૯॥

પુત્રસ્નેહભરૈઃ સદાસ્નુતકુચદ્વન્દ્વા તદીયોચ્છલ-
દ્ધર્મસ્યાપિ લવસ્ય રક્ષણવિધૌ સ્વપ્રાણદેહાર્બુદૈઃ ।
આસક્તા ક્ષણમાત્રમપ્યકલનાત્સદ્યઃ પ્રસૂતેવ ગૌ-
ર્વ્યગ્રાયા વિલપત્યલં બહુભયાત્સા પાતુ ગોષ્ઠેશ્વરી ॥ ૧૦॥

પુત્રાદુચ્ચૈરપિ હલધરાત્સિઞ્ચતિ સ્નેહપુરૈ-
ર્ગોવિન્દં યાદ્ભુતરસવતીપ્રક્રિયાસુ પ્રવીણા ।
સખ્યશ્રીભિર્વ્રજપુરમહારાજરાજ્ઞીં નયૈસ્ત-
દ્ગોપેન્દ્રં યા સુખયતિ ભજે રોહિણીમીશ્વરીં તામ્ ॥ ૧૧॥

ઉદ્યચ્છુભ્રાંશુકોટિદ્યુતિનિકરતિરસ્કારકાર્યુજ્જ્વલશ્રી-
ર્દુર્વારોદ્દામધામપ્રકરરિપુઘટોન્માદવિધ્વંસિદગ્ધઃ ।
સ્નેહાદપ્યુન્નિમેષં નિજમનુજમિતોઽરણ્યભૂમૌ સ્વવીતં
તદ્વીર્યજ્ઞોઽપિ યો ન ક્ષણમુપનયતે સ્તૌમિ તં ધેનુકારિમ્ ॥ ૧૨॥

પર્જન્યનામાનિજનપ્તૃગર્વૈઃ
પર્જન્યલક્ષાનભિતો વિનિન્દન્।
યો નર્મ તન્વન્નમતેઽસ્ય કર્ણે

નમામ્યહો કૃષ્ણપિતામહં તમ્ ॥ ૧૩॥

પ્રિયસ્ય નપ્તુઃ સુખતોઽતિગર્વા-
ત્પાદૌ ન યસ્યાઃ પતતઃ પૃથિવ્યામ્ ।
નમામિ નર્માર્ચિતનપ્તૃચન્દ્રાં
વરીયસીં કૃષ્ણપિતામહીં તામ્ ॥ ૧૪॥

શ્વેતશ્મશ્રુભરેણ સુન્દરમુખઃ શ્યામઃ કૃતી મન્ત્રણા
ભિજ્ઞઃ સંસદિ સન્તતં વ્રજપતેઃ કુર્વન્સ્થિતિઃ યોઽર્ચિતઃ ।
સ્વપ્રાણાર્બુદખણ્ડનૈર્મુરભિદં ભ્રાતુઃ સુતં તોષયે-
ત્સાહારે નિવસન્સગોષ્ઠમવતાન્નામ્નોપનન્દઃ સદા ॥ ૧૫॥

ગૌરઃ કોમલધીરુદારચરિતઃ સ્નિગ્ધો વ્રજેન્દ્રાનુજઃ
શ્યામશ્મશ્રુરલં તદીયચરણે ભક્તઃ સુનન્દાપિતા ।
યઃ પ્રાણૈઃ પરિમઞ્છ્ય માધવસુખં દધ્ના મહિષ્યાઃ પરં
સન્નન્દસ્તનુતે સ પાતુ નિતરાં નઃ કાસરીણાં પતિઃ ॥ ૧૬॥

શ્યામઃ સૂક્ષ્મમતિર્યુવાતિમધુરો જ્યોતિર્વિદામગ્રણીઃ
પાણ્ડિત્યૈર્જિતગીષ્પતિર્વ્રજપતેઃ સવ્યે કૃતાવસ્થિતિઃ ।
કૃષ્ણં પાલયતીહ યઃ પ્રિયતમા પ્રાણાર્બુદૈરપ્યલં
મન્ત્રેણાપ્યુપનન્દસૂનુમિહ તં પ્રીત્યા સુભદ્રં નુમઃ ॥ ૧૭॥

દૈત્યાદ્ભીતેરતિવિકલધીઃ કોમલાઙ્ગસ્ય સૂનોઃ
કૃષ્ણસ્યોચ્ચૈઃ સતતમવને વત્સલા વ્યગ્રચિત્તા ।
કૃચ્છ્રૈરમ્બાં બહુભિરભિતો હન્ત સન્તોષ્ય શૂરં
દૈત્યઘ્નં યા સુતમજનયત્સામ્બિકા પાતુ ધાત્રી ॥ ૧૮॥

નાદૈર્યસ્ય સ્ફુટતિ પરિતો દિવ્યવિધ્યણ્ડકોટિઃ
કે તે તાવત્કિલ દિતિસુતાઃ ક્ષુદ્રકાત્ક્ષુદ્રજીવાઃ ।
સ્નેહાન્માત્રા વિજયમભિતો રક્ષણે સન્નિયુક્તં
કૃષ્ણસ્યારાત્પરમિહ ભજે હન્ત ધાત્રી સુતં તમ્ ॥ ૧૯॥

મન્ત્રન્યાસૈરિહ મુરરિપોસ્તત્પુરોધાઃ પુરસ્તા-
ત્સર્વાઙ્ગાનિ પ્રકટનિગમો ભાગુરિર્યોઽભિરક્ષ્ય ।
આશીર્ભિશ્ચ પ્રતિદિનમહો તચ્છિરો જિઘ્રતીદં
વન્દે તાવન્મુનિસુરપતેસ્તસ્ય પાદાબ્જયુગ્મમ્ ॥ ૨૦॥

કૃષ્ણસ્યોચ્ચૈઃ પ્રણયવસતિઃ સંપ્રવીણઃ સખીનાં
    શ્યામાઙ્ગસ્તત્સમગુણં વયોવેશસૌન્દર્યદર્પઃ ।
સ્નેહાદન્ધઃ ક્ષણમકલનાજ્જાયતે યોઽવધૂતઃ
    શ્રીદામાનં હરિસહચરં સર્વદા તં પ્રપદ્યે ॥ ૨૧॥

ગાઢાનુરાગભવતો વિરહસ્ય ભીત્યા
    સ્વપ્નેઽપિ ગોકુલવિધોર્ન જહાતિ હસ્તમ્ ।
યો રાધિકાપ્રણયનિર્ઝરસિક્તચેતા
    સ્તં પ્રેમવિહ્વલતનું સુબલં નમામિ ॥ ૨૨॥

કૃત્વૈકત્ર ગવાં કુલાનિ પરિતઃ કૃષ્ણેન સાર્ધં મુદા
    હસ્તાહસ્તિ વિનોદનર્મકથનૈઃ ખેલન્તિ મિત્રોત્કરાઃ ।
પ્રેમામ્ભોધિવિધૌતગૌરવમહાપઙ્કાસ્તદઙ્ઘ્ર્યર્ચિતા
    સ્તત્પાદાર્પિતચિત્તજીવિતકલા યે તાન્પ્રપદ્યામહે ॥ ૨૩॥

મૂર્તો હાસ્યરસઃ સદૈવ સુમનાઃ કામં બુભુક્ષાતુરઃ
    પ્રાણપ્રેષ્ઠવયસ્યયોરનુદિનં વાગ્દેહભઙ્ગ્યુત્કરૈઃ ।
હાસ્યં યો મધુમઙ્ગલઃ પ્રકટયન્સમ્ભ્રાજતે કૌતુકી
    તં વૃન્દાવનચન્દ્રનર્મસચિવં પ્રીત્યાશુ વન્દામહે ॥ ૨૪॥

ગૂઢં તત્સુવિદગ્ધતાર્ચિતસખીદ્વારોન્નયન્તી તયોઃ
    પ્રેમ્ના સુષ્ઠુ વિદગ્ધયોરનુદિનં માનાભિસારોત્સવઃ ।
રાધામાધવયોઃ સુખામૃતરસં યૈવોપભુઙ્ક્તે મુહુ-
    ર્ગોષ્ઠે ભવ્યવિધાયિનીં ભગવતીં તાં પૌર્ણમાસીં ભજે ॥ ૨૫॥

ખર્વશ્મશ્રુમુદારમુજ્જ્વલકુલં ગૌરં સમાનં સ્ફુર-
    ત્પઞ્ચાશત્તમવર્ષવન્દિતવયઃક્રાન્તિં પ્રવીણં વ્રજે ।
ગોષ્ઠેશસ્ય સખાયમુન્નતતરશ્રીદામતોઽપિ પ્રિય
    શ્રીરાધં વૃષભાનુમુદ્ભટયશોવ્રાતં સદા તં ભજે ॥ ૨૬॥

અનુદિનમિહ માત્રા રાધિકાભવ્યવાર્તાઃ
    કલયિતુમતિયત્નાત્પ્રેષ્યતે ધાત્રિકાયાઃ ।
દુહિતૃયુગલમુચ્ચૈઃ પ્રેમપૂરપ્રપઞ્ચૈ-
    ર્વિકલમતિ યયાસૌ કીર્તિદા સાવતાન્નઃ ॥ ૨૭॥

પ્રથમરસવિલાસે હન્ત રોષેણ તાવ-
    ત્પ્રકટમિવ વિરોધં સન્દધાનાપિ ભઙ્ગ્યા ।

પ્રવલયતિ સુખં યા નવ્યયૂનોઃ સ્વનપ્ત્રોઃ
    પરમિહ મુખરાં તાં મૂર્ધ્નિ વૃદ્ધાં વહામિ ॥ ૨૮॥

સાન્દ્રપ્રેમરસૈઃ પ્લુતા પ્રિયતયા પ્રાગલ્ભ્યમાપ્તા તયોઃ
    પ્રાણપ્રેષ્ઠવયસ્યયોરનુદિનં લીલાભિસારં ક્રમૈઃ ।
વૈદગ્ધ્યેન તથા સખીં પ્રતિ સદા માનસ્ય શિક્ષાં રસૈ-
    ર્યેયં કારયતીહ હન્ત લલિતા ગૃહ્ણાતુ સા માં ગણૈઃ ॥ ૨૯॥

પ્રણયલલિતનર્મસ્ફારભૂમિસ્તયોર્યા
    વ્રજપુરનવયૂનોર્યા ચ કણ્ઠાન્પિકાનામ્ ।
નયતિ પરમધસ્તાદ્દિવ્યગાનેન તુષ્ટ્યા
    પ્રથયતુ મમ દીક્ષાં હન્ત સેયં વિશાખા ॥ ૩૦॥

પ્રતિનવનવકુઞ્જં પ્રેમપૂરેણ પૂર્ણા
    પ્રચુરસુરભિપુષ્પૈર્ભૂષયિત્વા ક્રમેણ ।
પ્રણયતિ બત વૃન્દા તત્ર નીલોત્સવં યા
    પ્રિયગણવૃતરાધાકૃષ્ણયોસ્તાં પ્રપદ્યે ॥ ૩૧॥

સખ્યેનાલં પરમરુચિરા નર્મભવ્યેન રાધાં
    પાકાર્થં યા વ્રજપતિમહિષ્યાજ્ઞયા સન્નયન્તી ।
પ્રેમ્ણા શશ્વત્પથિ પથિ હરેર્વાર્તયા તર્પયન્તી
    તુષ્યત્વેતાં પરમિહ ભજે કુન્દપૂર્વાં લતાં તામ્ ॥ ૩૨॥

વ્રજેશ્વર્યાનીતાં બત રસવતીકૃત્યવિધયે
    મુદા કામં નન્દીશ્વરગિરિનિકુઞ્જે પ્રણયિની ।
છલૈઃ કૃષ્ણઃ રાધાં દયિતમભિ તાં સારયતિ યા
    ધનિષ્ઠાં તત્પ્રાણપ્રિયતરસખીં તાં કિલ ભજે ॥ ૩૩॥

અવન્તીતઃ કીર્તેઃ શ્રવણભવતો મુગ્ધહૃદયા
    પ્રગાઢોત્કણ્ઠાભિર્વ્રજભુવમુરીકૃત્ય કિલ યા ।
મુદા રાધાકૃષ્ણોજ્જ્વલરસસુખં વર્ધયતિ તાં
    મુખીં નાન્દીપૂર્વાં સતતમભિવન્દે પ્રણયતઃ ॥ ૩૪॥

મુદા રાધાકૃષ્ણપ્રચુરજલકેલી રસભર
    સ્ખલત્કસ્તૂરીતદ્ઘુસૃણઘનચર્ચાર્ચિતજલા ।
પ્રમોદાત્તૌ ક્ણસ્મિતમુદિતમૂર્મિસ્ફુટકર
    શ્રિયા સિઞ્ચન્તીવ પ્રથયતુ સુખં નસ્તરણિજા ॥ ૩૫॥

સર્વાનન્દકદમ્બકેન હરિણા પ્રાગ્યાચિતા અપ્યમૂઃ
    સ્વૈરં ચારુ રિરંસયા રહસિ યાઃ ક્રોધાદનાદૃત્ય તામ્ ।
પ્રાણપ્રેષ્ઠસખીં નિજામનુદિનં તેનૈવ સાર્ધં મુદા
    રાધાં સંરમયન્તિ તાઃ પ્રિયસખી મૂર્ધ્ના પ્રપદ્યેતરામ્ ॥ ૩૬ ॥

પ્રેમ્ણા યે પરિબણ્ટનેન કલિતાઃ સેવાસદૈવોત્સુકાઃ
    કુર્વાણાઃ પરમાદરેણ સતતં દાસા વયસ્યોપમાઃ ।
વંશીદર્પણદૂત્યવારિવિલસત્તામ્બૂલવીણાદિભિઃ
    પ્રાણેશં પરિતોષયન્તિ પરિતસ્તાન્પત્રિમુખ્યાન્ભજે ॥ ૩૭ ॥

તામ્બૂલાર્પણપાદમર્દનપયોદાનાભિસારાદિભિ-
    ર્વૃન્દારણ્યમહેશ્વરીં પ્રિયતયા યાસ્તોષયન્તિ પ્રિયાઃ ।
પ્રાણપ્રેષ્ઠસખીકુલાદપિ કિલાસઙ્કોચિતાભૂમિકાઃ
    કેલીભૂમિષુ રૂપમઞ્જરીમુખાસ્તા દાસિકાઃ સંશ્રયે ॥ ૩૮ ॥

તૃણીકૃત્ય સ્ફારં સુખજલધિસારં સ્ફુટમપિ
    સ્વકીયં પ્રેમ્ણાં યે ભરનિકરનમ્રા મુરરિપોઃ ।
સુખાભાસં શશ્વત્પ્રથયિતુમલં પ્રૌઢકુતુકા-
    દ્વતન્તે તાન્ધન્યાન્પરમિહ ભજે માધવગણાન્ ॥ ૩૯ ॥

તસ્યાઃ ક્ષણાદર્શનતો મ્રિયન્તે
    સુખેન તસ્યાઃ સુખિનો ભવન્તિ ।
સ્નિગ્ધાઃ પરં યે કૃતપુણ્યપુઞ્જાઃ
    પ્રાણેશ્વરીપ્રેષ્ઠગણાન્ભજે તાન્ ॥ ૪૦ ॥

સાપત્ન્યોચ્ચયરજ્યદુજ્જ્વલરસસ્યોચ્ચૈઃ સમુદ્ધૃદ્ધયે
    સૌભાગ્યોદ્ભટગર્વવિભ્રમભૃતઃ શ્રીરાધિકાયાઃ સ્ફુટમ્ ।
ગોવિન્દઃ સ્મરફુલ્લવલ્લવવધૂવર્ગેણ યેન ક્ષણં
    ક્રીડત્યેષ તમત્ર વિસ્તૃતમહાપુણ્યં ચ વન્દામહે ॥ ૪૧ ॥

બ્રહ્માણ્ડાત્પરમુચ્છલત્સુખભરં તત્કોટિસઙ્ખ્યાદપિ
    પ્રેમ્ણા કૃષ્ણસુરક્ષિતાઃ પ્રતિમુહુઃ પ્રાપ્તાઃ પરં નિર્વૃતાઃ ।
કામં તત્પાદપદ્મસુન્દરનખપ્રાન્તસ્ખલદ્રેણુકા
    રક્ષાવ્યગ્રધિયઃ સ્ફુરન્તિ કિલ યે તાન્ગોપવર્યાન્ભજે ॥ ૪૨ ॥

પ્રાણેભ્યોઽપ્યધિકૈઃ પ્રિયૈરપિ પરં પુત્રૈર્મુકુન્દસ્ય યાઃ

સ્નેહાત્પાદસરોજયુગ્મવિગલદ્ઘર્મસ્ય બિન્દોઃ કણમ્ ।
નિર્મઞ્છ્યોરુશિખણ્ડસુન્દરશિરશ્ચુમ્બન્તિ ગોપ્યશ્ચિરં
તાસાં પાદરજાંસિ સન્તતમહં નિર્મઞ્છયામિ સ્ફુટમ્ ॥ ૪૩॥

ઇન્દ્રનીલખુરરાજિતાઃ પરં
સ્વર્ણબદ્ધવરશૃઙ્ગરઞ્જિતાઃ ।
પાણ્ડુગણ્ડગિરિગર્વખર્વિકાઃ
પાન્તુ નઃ સપદિ કૃષ્ણધેનવઃ ॥ ૪૪॥

યાસાં પાલનદોહનોત્સવરતઃ સાર્ધં વયસ્યોત્કરૈઃ
કામં રામવિરાજિતઃ પ્રતિદિનં તત્પાદરેણૂજ્જ્વલમ્ ।
પ્રીત્યા સ્ફીતવનોરુપર્વતનદીકચ્છેષુ બદ્ધસ્પૃહો
ગોષ્ઠાખણ્ડલનન્દનો વિહરતે તાઃ સૌરભેયીર્ભજે ॥ ૪૫॥

મણિખચિતસુવર્ણશ્લિષ્ટશૃઙ્ગદ્વયશ્રી-
રસિતમણિમનોજ્ઞજ્યોતિરુદ્યત્ખુરાઢ્યઃ ।
સ્ફુરદરુણિમગુચ્છાન્દોલવિદ્યોતિકણ્ઠઃ
સ જયતિ બકશત્રોઃ પદ્મગન્ધઃ કકુદ્મી ॥ ૪૬॥

મૃદુનવતૃનમલ્પં સસ્પૃહં વક્ત્રમધ્યે
ક્ષિપતિ પરમયત્નાદલ્પકણ્ડૂં ચ ગાત્રે ।
પ્રથયતિ મુરવૈરી હન્ત યદ્વત્સકાનાં
સપદિ કિલ દિદૃક્ષે તત્તદાટીકનાનિ ॥ ૪૭॥

નક્તં દિવં મુરરિપોરધરામૃતં યા
સ્ફીતા પિબત્યલમબાધમહો સુભાગ્યા ।
શ્રીરાધિકાપ્રથિતમાનમપીહ દિવ્ય
નાદૈરધો નયતિ તાં મુરલીં નમામિ ॥ ૪૮॥

દૂતીભિર્બહુચાટુભિઃ સખિકુલેનાલં વચોભઙ્ગિભિઃ
પાદાન્તે પતનૈર્વ્રજેન્દ્રતનયેનાપિ ક્રુદ્ધાલીગણૈઃ ।
રાધાયાઃ સખિ શક્યતે દવયિતું યો નૈવ માનો યયા
ફુત્કૃત્યૈવ નિરસ્યતે સુકૃતિનીં વંશીં સખીં તાં નુમઃ ॥ ૪૯॥

સ્ફીતસ્તાણ્ડવિકો હરેર્મુરલિકાનાદેન નૃત્યોત્સવં
ઘૂર્ણશ્ચારુશિખણ્ડવલ્ગુસરસીતીરે નિકુઞ્જાગ્રતઃ ।
તન્વન્કુઞ્જવિહારિણોઃ સુખભરં સમ્પાદયેદ્યસ્તયોઃ

સ્મૃત્વા તં શિખિરાજમુત્સુકતયા બાઢં દિદૃક્ષામહે ॥ ૫૦॥

સપ્તાહં મુરમર્દનઃ પ્રણયતો ગોષ્ઠૈકરક્ષોત્સુકો
બિભ્રન્માનમુદારપાણિરમણૈર્યસ્મૈ સલિલં દદૌ ।
ગાન્ધર્વામુરભિદ્વિલાસવિગલત્કાશ્મીરરજ્યદ્દ્રુહ
સ્તત્ખટ્ટાયિતરત્નસુન્દરશિલો ગોવર્ધનઃ પાતુ વઃ ॥ ૫૧॥

નીપૈશ્ચમ્પકપાલિભિર્નવવરાશોકૈ રસાલોત્કરૈઃ
પુન્નાગૈર્બકુલૈર્લવઙ્ગલતિકા વાસન્તિકાભિર્વૃતૈઃ ।
હૃદ્યં તત્પ્રિયકુણ્ડયોસ્તટમિલન્મધ્યપ્રદેશં પરં
રાધામાધવયોઃ પ્રિયસ્થલમિદં કેલ્યાસ્તદેવાશ્રયે ॥ ૫૨॥

શ્રીવૃન્દાવિપિનં સુરમ્યમપિ તચ્છ્રીમાન્સ ગોવર્ધનઃ
સા રસસ્થલિકાપ્યલં રસમયી કિં તાવદન્યસ્થલમ્ ।
યસ્યાપ્યંશલવેન નાર્હતિ મનાક્સામ્યં મુકુન્દસ્ય તત્-
પ્રાણેભ્યોઽપ્યધિકપ્રિયેવ દયિતં તત્કુણ્ડમેવાશ્રયે ॥ ૫૩॥

સ્ફીતે રત્નસુવર્ણમૌક્તિકભરૈઃ સન્નિર્મિતે મણ્ડપે
થૂત્કારં વિનિધાય યત્ર રભસાત્તૌ દમ્પતી નિર્ભરમ્ ।
તન્વાતે રતિનાથનર્મસચિવૌ તદ્રાજ્યચર્ચાં મુદા
તં રાધાસરસીતટોજ્જ્વલમહાકુઞ્જં સદાહં ભજે ॥ ૫૪॥

કાન્ત્યા હન્ત મિથઃ સ્ફુટં હૃદિ તટે સમ્બિમ્બિતં દ્યોતતે
પ્રીત્યા તન્મિથુનં મુદા પદકવદ્રાગેણ બિભ્રદ્યયોઃ ।
ધાત્રા ભાગ્યભરેણ નિર્મિતતરે ત્રૈલોક્યલક્ષ્મ્યાસ્પદે
ગૌરશ્યામતમે ઇમે પ્રિયતમે રૂપે કદાહં ભજે ॥ ૫૫॥

નેત્રોપાન્તવિઘૂર્ણનૈરલઘુ તદ્દોર્મૂલસઞ્ચાલનૈ-
રીષદ્ધાસ્યરસૈઃ સુધાધરધયૈશ્ચુમ્બૈર્દૃઢાલિઙ્ગનૈઃ ।
એતૈરિષ્ટમહોપચારનિચયૈસ્તન્નવ્યયૂનોર્યુગં
પ્રીત્યા યં ભજતે તમુજ્જ્વલમહારાજં પ્રવન્દામહે ॥ ૫૬॥

નેત્રે દૈર્ઘ્યમપાઙ્ગયોઃ કુટિલતા વક્ષોજવક્ષઃસ્થલે
સ્થૌલ્યં તન્મૃદુવાચિ વક્રિમધુરા શ્રોણૌ પૃથુ સ્ફારતા ।
સર્વાઙ્ગે વરમાધુરી સ્ફુટમભૂદ્યેનેહ લોકોત્તરા
રાધામાધવયોરલં નવવયઃ સન્ધિં સદા તં ભજે ॥ ૫૭॥

દુષ્ટારિષ્ટવધે સ્વયં સમુદભૂત્કૃષ્ણાઙ્ઘ્રિપદ્માદિદં
સ્ફીતં યન્મકરન્દવિસ્તૃતિરિવારિષ્ટાખ્યમિષ્ટં સરઃ ।
સોપાનૈઃ પરિરઞ્જિતં પ્રિયતયા શ્રીરાધયા કારિતૈઃ
પ્રેમ્ણાલિઙ્ગદિવ પ્રિયા સર ઇદં તન્નીત્યનિત્યં ભજે ॥ ૫૮॥

કદમ્બાનાં વ્રાતૈર્મધુપકુલઝઙ્કારલલિતૈઃ
પરીતે યત્રૈવ પ્રિયસલિલલીલાહતિમિષૈઃ ।
મુહુર્ગોપેન્દ્રસ્યાત્મજમભિસરન્ત્યમ્બુજદૃશો
વિનોદેન પ્રીત્યા તદિદમવતાત્પાવનસરઃ ॥ ૫૯॥

પર્જણ્યેન પિતામહેન નિતરામારાધ્ય નારાયણં
ત્યક્ત્વાહારમભૂત પુત્રક ઇહ સ્વીયાત્મજે ગોષ્ઠપે ।
યત્રાવાપિ સુરારિહા ગિરિધરઃ પૌત્રો ગુણૈકાકરઃ
ક્ષુણ્ણાહારતયા પ્રસિદ્ધમવનૌ તન્મે તડાગં ગતિઃ ॥ ૬૦॥

સાર્ધં માનસજાહ્નવીમુપનદીવર્ગૈઃ સરઙ્ગોત્કરૈઃ
સાવિત્ર્યાદિસુરીકુલૈશ્ચ નિતરામાકાશવાણ્યા વિધોઃ ।
વૃન્દારણ્યવરેણ્યરાજ્યવિષયે શ્રીપૌર્ણમાસી મુદા
રાધાં યત્ર સિષેચ સિઞ્ચતુ સુખં સોન્મત્તરાધાસ્થલી ॥ ૬૧॥

પ્રીત્યા નન્દીશ્વરગિરિતટે સ્ફારપાષાણવૃન્દૈ-
શ્ચાટુષ્કોણ્યેઽનુકૃતિગુરુભિર્નિર્મિતા યા વિદગ્ધૈઃ ।
રેમે કૃષ્ણઃ સખિપરિવૃતો યત્ર નર્માણિ તન્વન્-
નાસ્થાનીં તાં હરિપદલસત્સૌરભાક્તાં પ્રપદ્યે ॥ ૬૨॥

વૈદગ્ધ્યોજ્જ્વલવલ્ગુવલ્લવવધૂવર્ગેણ નૃત્યન્નસૌ
હિત્વા તં મુરજિદ્રસેન રહસિ શ્રીરાધિકાં મણ્ડયન્।
પુષ્પાલઙ્કૃતિસઞ્ચયેન રમતે યત્ર પ્રમોદોત્કરૈ-
સ્ત્રૈલોક્યાદ્ભુતમાધુરી પરિવૃતા સા પાતુ રાસસ્થલી ॥ ૬૩॥

ગાન્ધર્વિકામુરવિમર્દનનૌવિહાર
લીલાવિનોદરસનિર્ભરભોગિનીયમ્ ।
ગોવર્ધનોજ્જ્વલશિલાકુલમુન્નયન્તી
વીચીભરૈરવતુ માનસજાહ્નવી મામ્ ॥ ૬૪॥

યેષાં ક્વાપિ ચ માધવો વિહરતે સ્નિગ્ધૈર્વયસ્યોત્કરૈ-
સ્તદ્ધાતુદ્રવપુઞ્જચિત્રિતતરૈસ્તૈસ્તૈઃ સ્વયં ચિત્રિતઃ ।

ખેલાભિઃ કિલપાલનૈરપિ ગવાં કુત્રાપિ નર્મોત્સવૈઃ
    શ્રીરાધાસહિતો ગુહાસુ રમતે તાન્શૈલવર્યાન્ભજે ॥ ૬૫॥

સ્ફીતે યત્ર સરિત્સરોવરકુલે ગાઃ પાલયન્નિર્વૃતે
    ગ્રીષ્મે વારિવિહારકેલિનિવહૈર્ગોપેન્દ્રવિદ્યાત્મજઃ ।
પ્રીત્યા સિઞ્ચતિ મુગ્ધમિત્રનિકરાન્હર્ષેણ મુગ્ધઃ સ્વયં
    કાઙ્ક્ષન્સ્વીયજયં જયાર્થિન ઇમાન્નિત્યં તદેતદ્ભજે ॥ ૬૬॥

યેષાં કચ્છપિકા લસન્મુરલિકાનાદેન હર્ષોત્કરૈઃ
    સ્રસ્તાર્ધસ્તૃણગુચ્છ એષ નિતરાં વક્ત્રેષુ સંસ્તમ્ભતે ।
સખ્યેનાપિ તયોઃ પરં પરિવૃતા રાધાબકદ્વેષિણો
    સ્તે હૃદ્યા મૃગયૂથપાઃ પ્રતિદિનં માં તોષયન્તુ સ્ફુટમ્ ॥ ૬૭॥

ગુઞ્જદ્ભૃઙ્ગકુલેન જુષ્ટકુસુમૈઃ સંલબ્ધમઞ્જુશ્રિયાં
    કુઞ્જાનાં નિકરેષુ યેષુ રમતે સૌરભ્યવિસ્તારિણાઃ ।
ઉદ્યત્કામતરઙ્ગરઙ્ગિતમનસ્તન્નવ્યયૂનોર્યુગં
    તેષાં વિસ્તૃતકેશપાશનિકરૈઃ કુર્યામહો માર્જનમ્ ॥ ૬૮॥

યેષાં ચારુ તલેષુ શીતનિવિડચ્છાયેષુ રાત્રિન્દિવં
    પુષ્પાણાં વિગલત્પરાગવિલસત્તલ્પેષુ ક્લૃપ્તાશ્રયમ્ ।
પ્રીત્યા સ્નિગ્ધમધુવ્રતૈર્મધુકણૈઃ સંસેવિતં તન્નવં
    યૂનોર્યુગ્મતરં મુદા વિહરતે તે પાન્તુ માં ભૂરુહામ્ ॥ ૬૯॥

ગાન્ધર્વા મુરવૈરિણોઃ પ્રણયિણોઃ પુષ્પાણિ સઞ્ચિન્વતોઃ
    સ્વૈરં સ્મેરસખીકુલેન વૃતયોરીષત્સ્મિતેન દ્વયોઃ ।
દૃષ્ટ્વા કેલિકલિં તયોર્નવનવં હાસ્યેન પુષ્પચ્છલૈઃ
    કામં યા વિલસન્તિ તાઃ કિલ લતાઃ સેવ્યાઃ પરં પ્રેમભિઃ ॥ ૭૦॥

પરિચયરસમગ્નાઃ કામમારાત્તયોર્યે
    મધુરતરરુતેનોલ્લાસમુલ્લાસયન્તિ ।
વ્રજભુવિ નવયૂનોઃ સુપ્રિયાઃ પક્ષિણસ્તે
    વિદધતુ મમ સૌખ્યં સ્ફારમાલોકનેન ॥ ૭૧॥

ચૂતેષ્વેષુ કદમ્બકેષુ બકુલેષ્વન્યેષુ વૃક્ષેષ્વલં
    પ્રીત્યા માધવિકાદિવલ્લિષુ તથા ભાઙ્કારનાદૈર્દ્વયોઃ ।
યે ભૃઙ્ગાઃ પરિતસ્તયોઃ સુખભરં વિસ્તારયન્તિ સ્ફુટં
    ગુઞ્જન્તો બત વિભ્રમેણ નિતરાં તાનેવ વન્દામહે ॥ ૭૨॥

પુષ્પૈર્યસ્ય મુદા સ્વયં ગિરિધરં સ્વૈરં નિકુઞ્જેશ્વરીં
ફુલ્લાં ફુલ્લતરૈરમણ્ડયદલં ફુલ્લો નિકુઞ્જેશ્વરઃ ।
ઈષન્નેત્રવિઘૂર્ણનેન કલિતસ્વાધીન ઉચ્ચૈસ્તયા
શ્રીમાન્સ પ્રથયત્વહો મમ દૃશોઃ સૌખ્યં કદમ્બેશ્વરઃ ॥ ૭૩॥

નીચૈઃ પ્રૌઢભયાત્સ્વયં સુરપતિઃ પાદૌ વિધૃત્યેહ યૈઃ
સ્વર્ગઙ્ગાસલિલૈશ્ચકાર સુરભિદ્વારાભિષેકોત્સવમ્ ।
ગોવિન્દસ્ય નવં ગવામધિપતા રાજ્યે સ્ફુટં કૌતુકા-
ત્તૈર્યત્પ્રાદુરભૂત્સદા સ્ફુરતુ તદ્ગોવિન્દકુણ્ડં દૃશોઃ ॥ ૭૪॥

વ્રજેન્દ્રવર્યાર્પિતભોગમુચ્ચૈ-
ર્ધૃત્વા બૃહત્કાયમઘારિરુત્કઃ ।
વરેણ રાધાં છલયન્વિભુઙ્ક્તે
યત્રાન્નકૂટં તદહં પ્રપદ્યે ॥ ૭૫॥

ગિરીન્દ્રવર્યોપરિહારરૂપી
હરિઃ સ્વયં યત્ર વિહારકારી ।
સદા મુદા રાજતિ રાજભોગૈ-
ર્હરિસ્થલં તત્તુ ભજેઽનુરાગૈઃ ॥ ૭૬॥

ઘટ્ટક્રીડાકુતુકિતમના નાગરેન્દ્રોનવીનો
દાની ભૂત્વા મદનનૃપતેર્ગવ્યદાનચ્છલેન ।
યત્ર પ્રાતઃ સખિભિરભિતો  વેષ્ટિતઃ સંરુરોધ
શ્રીગાન્ધર્વાં નિજગણવૃતાં નૌમિ તાં કૃષ્ણવેદીમ્ ॥ ૭૭॥

નિભૃતમજનિ યસ્માદ્દાનનિર્વૃતિરસ્મિ
યત્ર ઇદમભિધાનં પ્રાપયત્તત્સભાયામ્ ।
રસવિમુખનિગૂઢે તત્ર તજ્જ્ઞૈકવેદ્યે
સરસિ ભવતિ વાસો દાનનિર્વર્તનેન ॥ ૭૮॥

સીરિબ્રહ્મકદમ્બખણ્ડસુમનોરુદ્રાપ્સરોગૌરિકા
જ્યોત્સ્નામોક્ષણમાલ્યહારવિબુધારીન્દ્રધ્વજાદ્યાખ્યયા ।
યાનિ શ્રેષ્ઠસરાંસિ ભાન્તિ પરિતો ગોવર્ધનાદ્રેરમૂ
નીડે ચક્રકતીર્થદૈવતગિરિ શ્રીરત્નપીઠાન્યપિ ॥ ૭૯॥

અહો દોલાક્રીડારસવરભરોત્ફુલ્લવદનૌ

મુહુઃ શ્રીગાન્ધર્વાગિરિવરધરુ તૌ પ્રતિ મધુ ।
સખીવૃન્દં યત્ર પ્રકટિતમુદાન્દોલયતિ તત્-
પ્રસિદ્ધં ગોવિન્દસ્થલમિદમુદારં બત ભજે ॥ ૮૦॥

પ્રિયા પ્રિયપ્રાણવયસ્યવર્ગૈ
ધૃતાપરાધં કિલ કાલિયં તમ્ ।
યત્રાર્દયત્પાદતલેન નૃત્ય-
ન્હરિર્ભજે તં કિલ કાલિયં હ્રદમ્ ॥ ૮૧॥

સૂર્યૈર્દ્વાદશભિઃ પરં મુરરિપુઃ શીતાર્ત ઉગ્રાતપૈ-
ર્ભક્તિપ્રેમભરૈરુદારચરિતઃ શ્રીમાન્મુદા સેવિતઃ ।
યત્ર સ્ત્રીપુરુષૈઃ ક્વણત્પશુકુલૈરાવેષ્ટિતો રાજતે
સ્નેહૈર્દ્વાદશસૂર્યનામ તદિદં તીર્થં સદા સંશ્રયે ॥ ૮૨॥

અત્યન્તાતપસેવનેન પરિતઃ સઞ્જાતઘર્મોત્કરૈ-
ર્ગોવિન્દસ્ય શરીરતો નિપતિતૈર્યત્તીર્થમુચ્ચૈરભૂત્ ।
તત્તત્કોમલસાન્દ્રસુન્દરતરશ્રીમત્સદઙ્ગોચ્છલ-
દ્ગન્ધૈર્હારિસુવારિસુદ્યુતિ ભજે પ્રસ્કન્દનં વન્દનૈઃ ॥ ૮૩॥

કાત્યાયન્યતુલાર્ચનાર્થમમલે કૃષ્ણાજલે મજ્જતઃ
કન્યાનાં પ્રકરસ્ય ચીરનિકરં સંરક્ષિતં તીરતઃ ।
હૃત્વારુહ્ય કદમ્બમુજ્જ્વલપરીહાસેન તં લજ્જય-
ન્સ્મેરંસ્તં પ્રદદૌ સુભઙ્ગિમુરજિત્તં ચીરઘટ્ટં શ્રયે ॥ ૮૪॥

હેષાભિર્જગતીત્રયં મદભરૈરુત્કમ્પયન્તં પરૈઃ
ફુલ્લન્નેત્રવિઘૂર્ણનેન પરિતઃ પૂર્ણં દહન્તં જગત્ ।
તં તાવત્તૃણવદ્વિદીર્ય બકભિદ્વિદ્વેષિણં કેશિનં
યત્ર ક્ષાલિતવાન્કરૌ સરુધિરૌ તત્કેશિતીર્થં ભજે ॥ ૮૫॥

અન્નૈર્યત્ર ચતુર્વિધૈઃ પૃથુગણૈઃ સ્વૈરં સુધાનિન્દિભિઃ
કામં રામસમેતમચ્યુતમહો સ્નિગ્ધૈર્વયસ્યૈર્વૃતમ્ ।
શ્રીમાન્યાજ્ઞિકવિજ્ઞસુન્દરવધૂવર્ગઃ સ્વયં યો મુદા
ભક્ત્યા ભોજિતવાન્સ્થલં ચ તદિદં તં ચાપિ વન્દામહે ॥ ૮૬॥

મુદા ગોપેન્દ્રસ્યાત્મજભુજપરિષ્વઙ્ગનિધયે
સ્ફુરદ્ગોપીવૃન્દૈર્યમિહ ભગવન્તં પ્રણયિભિઃ ।
ભજદ્ભિસ્તૈર્ભક્ત્યા સ્વમભિલષિતં પ્રાપ્તમચિરા-

ધમીતીરે ગોપીશ્વરમનુદિનં તં કિલ ભજે ॥ ૮૭॥

ભયાત્કંસસ્યારાત્સદયમચિરાચ્છન્તનુપદે
વિનિક્ષિપ્તા રાધા રહસિ કિલ પિત્રા પ્રકૃતિતઃ ।
સ્ફુરન્તં તં દૃષ્ટ્વા કમપિ ધનપુઞ્જાકૃતિવરં
તમેવાપ્તં યત્નાધમભજત સૂર્યોઽવતુ સ નઃ ॥ ૮૮॥

આવિર્ભાવમહોત્સવે મુરરિપોઃ સ્વર્ણોરુમુક્તાફલ
શ્રેણીવિભ્રમમણ્ડિતે નવગવીલક્ષે દદૌ દ્વે મુદા ।
દિવ્યાલઙ્કૃતિરત્નપર્વતતિલપ્રસ્થાદિકં ચાદરા-
દ્વિપ્રેભ્યઃ કિલ યત્ર સ વ્રજપતિર્વન્દે બૃહત્કાનનમ્ ॥ ૮૯॥

ગાન્ધર્વાયા જનિમણિરભૂદ્યત્ર સઙ્કીર્તિતાયાં
આનન્દોત્કૈઃ સુરમુનિનરૈઃ કીર્તિદાગર્ભખન્યામ્ ।
ગોપીગોપૈઃ સુરભીનિકરૈઃ સમ્પરીતેઽત્ર મુખે
રાવલ્યાખ્યે વૃષરવિપુરે પ્રીતિપૂરો મમાસ્તામ્ ॥ ૯૦॥

યસ્ય શ્રીમચ્ચરણકમલે કોમલે કોમલાપિ
શ્રીરાધોચ્ચૈર્નિજસુખકૃતે સન્નયન્તી કુચાગ્રે ।
ભીતાપ્યારાદથ નહિ દધાત્યસ્ય કાર્કશ્યદોષા-
ત્સ શ્રીગોષ્ઠે પ્રથયતુ સદા શેષશાયી સ્થિતિં નઃ ॥ ૯૧॥

યત્ર કામસરઃ સાક્ષાદ્ગોપિકારમણં સરઃ ।
રાધામાધવયોઃ પ્રેષ્ઠં તદ્વનં કામ્યકં ભજે ॥ ૯૨॥

મલ્લીકૃત્ય નિજાઃ સખીઃ પ્રિયતમા ગર્વેણ સમ્ભાવિતા
મલ્લીભૂય મદીશ્વરી રસમયી મલ્લત્વમુત્કણ્ઠયા ।
યસ્મિન્સમ્યગુપેયૂષા બકભિદા રાધા નિયુદ્ધં મુદા
કુર્વાણા મદનસ્ય તોષમતનોદ્ભાણ્ડીરકં તં ભજે ॥ ૯૩॥

આકૃષ્ટા યા કુપિતહલિના લાઙ્ગલાગ્રેણ કૃષ્ણા
ધીરા યાન્તી લવણજલધૌ કૃષ્ણસમ્બન્ધહીના ।
અદ્યાપીત્થં સકલમનુજૈર્દૃશ્યતે સૈવ યસ્મિ-
ન્ભક્ત્યા વન્દેઽદ્ભુતમિદમહો રામઘટ્ટં પ્રદેશમ્ ॥ ૯૪॥

પ્રાણપ્રેષ્ઠવયસ્યવર્ગમુદરે પાપીયસોઽઘાસુર
સ્યારણ્યોદ્ભટપાવકોત્કટવિષૈ'ર્દુષ્ટે પ્રવિષ્ટં પુરઃ ।

વ્યગ્રઃ પ્રેક્ષ્ય રુષા પ્રવિશ્ય સહસા હત્વા ખલં તં બલી
 યત્રૈનં નિજમારરક્ષ મુરજિત્સા પાતુ સર્પસ્થલી ॥ ૯૫॥

દ્રષ્ટું સાક્ષાત્સ્વપતિમહિમોદ્રેકમુત્કેન ધાત્રા
 વત્સવ્રાતે દ્રુતમપહૃતે વત્સપાલોત્કરે ચ ।
તત્તદ્રૂપો હરિરથ ભવન્યત્ર તત્તત્પ્રસૂનાં
 મોદં ચક્રેઽશનમપિ ભજે વત્સહારસ્થલીં તામ્ ॥ ૯૬॥

બાઢં વત્સકવત્સપાલહૃતિતો જાતાપરાધાદ્ભયૈ-
 ર્બ્રહ્મા સાસ્રમપૂર્વપદ્યનિવહૈર્યસ્મિન્નિપત્યાવનૌ ।
તુષ્ટાવાદ્ભુતવત્સપં વ્રજપતેઃ પુત્રં મુકુન્દં મનાક્
 સ્મેરં ભીરુચતુર્મુખાખ્યમનિશં સેશં પ્રદેશં નુમઃ ॥ ૯૭॥

ગન્ધવ્યાકુલભૃઙ્ગસઞ્ચયચમૂસઙ્ઘૃષ્ટપુષ્પોત્કરૈ-
 ર્ભાજત્કલ્પલતા પલાશિનિકરૈર્વિભ્રાજિતાનિ સ્ફુટમ્ ।
યાનિ સ્ફારતડાગપર્વતનદીવૃન્દેન રાજન્ત્યહો
 કૃષ્ણપ્રેષ્ઠવનાનિ તાનિ નિતરાં વન્દે મુહુર્દ્વાદશ ॥ ૯૮॥

પૂર્ણઃ પ્રેમરસૈઃ સદા મુરરિપોર્દાસઃ સખા ચ પ્રિયં
 સ્વપ્રાણાર્બુદતોઽપિ તત્પદયુગં હિત્વેહ માસાન્દશ ।
પ્રીત્યા યો નિવસંસ્તદીયકથયા ગોષ્ઠં મુહુર્જીવય-
 ત્યાયાતં કિલ પશ્ય કૃષ્ણમિતિ તં મૂર્ધ્ના વહામ્યુદ્ધવમ્ ॥ ૯૯॥

મુદા યત્ર બ્રહ્મા તૃણનિકરગુલ્માદિષુ પરં
 સદા કાઙ્ક્ષન્જન્માર્પિતવિવિધકર્માપ્યનુદિનમ્ ।
ક્રમાદ્યે તત્રૈવ વ્રજભુવિ વસન્તિ પ્રિયજના
 મયા તે તે વન્દ્યાઃ પરમવિનયાત્પુણ્યખચિતાઃ ॥ ૧૦૦॥

પુરા પ્રેમોદ્રેકૈઃ પ્રતિપદનવાનન્દમધુરૈઃ
 કૃતશ્રીગાન્ધર્વાચ્યુતચરણવર્યાર્ચનબલાત્ ।
નિકામં સ્વામિન્યઃ પ્રિયતરસરસ્તીરભુવને
 વસન્તિ સ્ફીત યે ત ઇહ મમ જીવાતવ ઇમે ॥ ૧૦૧॥

યત્કિઞ્ચિત્તૃગુલ્મકીકટમુખં ગોષ્ઠે સમસ્તં હિ તત્-
 સર્વાનન્દમયં મુકુન્દદયિતં લીલાનુકૂલં પરમ્ ।
શાસ્ત્રૈરેવ મુહુર્મુહુઃ સ્ફુટમિદં નિષ્ટઙ્કિતં યાચ્ઞયા
 બ્રહ્માદેરપિ સસ્પૃહેણ તદિદં સર્વં મયા વન્દ્યતે ॥ ૧૦૨॥

ભ્રમગ્ચચ્છે કચ્છે ક્ષિતિધરપતેર્વક્રિમગતૈ-
    ર્લપન્રાધે કૃષ્ણેત્યનવરતમુન્મત્તવદહમ્ ।
પતન્ક્વાપિ ક્વાપ્યુચ્છલિતનયનદ્વન્દ્વસલિલૈઃ
    કદા કેલિસ્થાનં સકલમપિ સિઞ્ચામિ વિકલઃ ॥ ૧૦૩॥

ન બ્રહ્મા ન ચ નારદો નહિ હરો ન પ્રેમભક્તોત્તમાઃ
    સમ્યગ્જ્ઞાતુમિહાઞ્જસાર્હતિ તથા યસ્યોચ્છલન્માધુરીમ્ ।
કિન્ત્વેકો બલદેવ એવ પરિતઃ સ્વાર્ધં સ્વમાત્રા સ્ફુટં
    પ્રેમ્નાપ્યુદ્ધવ એષ વેત્તિ નિતરાં કિં સ વ્રજો વર્ણ્યતે ॥ ૧૦૪॥

અન્યત્ર ક્ષણમાત્રમચ્યુતપુરે પ્રેમામૃટામ્ભોનિધિ
    સ્નાતોઽપ્યચ્યુત્યસજ્જનૈરપિ સમં નાહં વસામિ ક્વચિત્ ।
કિન્ત્વત્ર વ્રજવાસિનામપિ સમં યેનાપિ કેનાપ્યલં
    સંલાપૈર્મમ નિર્ભરઃ પ્રતિ મુહુર્વાસોઽસ્તુ નિત્યં મમ ॥ ૧૦૫॥

રાગેણ રૂપમઞ્જર્યારક્તીકૃતમુરદ્વિષઃ ।
ગુણારાધિતરાધાયાઃ પાદયુગ્મે રતિર્મમ ॥ ૧૦૬॥

ઇદં નિયતમાદરાદ્વ્રજવિલાસનામસ્તવં
    સદા વ્રજજનોલ્લસન્મધુરમાધુરીબન્ધુરમ્ ।
મુહુઃ કુતુકસમ્ભૃતાઃ પરિપઠતિ યે વલ્ગુ તત્-
    સમં પરિકરૈર્દૃઢં મિથુનમત્ર પશ્યન્તિ તે ॥ ૧૦૭॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીઅભીષ્ટસૂચનં શ્રીવ્રજવિલાસસ્તવઃ સમાપ્તઃ

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Radhikayah Premapurabhidhastotram ॥ શ્રીરાધિકાયાઃ પ્રેમપૂરાભિધસ્તોત્રમ્ ॥

મધુમધુરનિશાયાં જ્યોતિરુદ્ભાસિતાયાં
    સિતકુસુમસુવાસાઃ કૢપ્તકર્પૂરભૂષા ।
સુબલસખમુપેતા દૂતિકાન્યસ્તહસ્તા
    ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૧॥

સ્મરગૃહમવિશન્તી વામ્યતો ધામ ગન્તું
    સરણિમનુસરન્તી તેન સંરુદ્ધ્ય તૂર્ણમ્ ।
બલસવલિતકાક્વા લમ્ભિતાન્તઃસ્મિતાક્ષી
    ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૨॥

મુદિરરુચિરવક્ષસ્યુન્નતે માધવસ્ય
    સ્થિરચરવરવિદ્યુદ્વલ્લિવન્મલ્લિતલ્પે ।
લલિતકનકયૂથીમાલિકાવચ્ચ ભાન્તી
    ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૩॥

સ્મરવિલસિતતલ્પે જલ્પલીલામનલ્પાં
    ક્રમકૃતિપરિહીનાં બિભ્રતી તેન સાર્ધમ્ ।
મિથ ઇવ પરિરમ્ભારમ્ભવૃત્ત્યેકવર્ષ્મા
    ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૪॥

પ્રમદમદનયુદ્ધશ્રાન્તિતઃ કાન્તકૃષ્ણ
    પ્રચુરસુખદવક્ષઃસ્ફારતલ્પે સ્વપન્તી ।
રસમુદિતવિશાખાજીવિતાબ્ધૌ સમૃદ્ધા
    ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૫॥

અપિ બત સુરતાન્તે પ્રૌઢિસૌભાગ્યદૃપ્ય-

ત્પ્રણયધૃતસુસખ્યોન્માદમત્તોરુગર્વૈઃ ।
દરગદિતમુકુન્દાકલ્પિતાકલ્પતલ્પા
ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૬॥

સ્મરદયિતનિકુઞ્જપ્રાઙ્ગણે વ્યાવહાસ્યાં
વ્રજનવયુવરાજં વક્રિમાડમ્બરેણ ।
સદસિ પરિભવન્તી સંસ્તુતાલીકુલેન
ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૭॥

ક્વચન ચ દરદોષાદ્દૈવતઃ કૃષ્ણજાતા-
ત્સપદિ વિહિતમાના મૌનિની તત્ર તેન ।
પ્રકટિતપટુચાટુપ્રાર્થ્યમાનપ્રસાદા
ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૮॥

પિતુરિહ વૃસભાનોર્ભાગ્યભઙ્ગી બકારેઃ
પ્રણયવિપિનભૃઙ્ગી સઙ્ગિની તસ્ય દેવી ।
નિજગણકુમુદાલેઃ કૌમુદી હા કૃપાબ્ધે
ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૯॥

નિરવધિગુણસિન્ધો ભદ્રસેનાદિબન્ધો
નિરુપમગુણવૃન્દપ્રેયસીવૃન્દમૌલે ।
અતિકદનસમુદ્રે મજ્જતો હા કૃપાર્દ્રે
ક્ષણમપિ મમ રાધે નેત્રમાનન્દય ત્વમ્ ॥ ૧૦॥

નટયતિ રુચિનાન્દીમુન્નયન્સૂત્રધાર
પ્રવર ઇવ રસજ્ઞાનર્તકીં રઙ્ગરૂપે ।
રસવતિ દશકેઽસ્મિન્પ્રેમપૂરાભિધે યઃ
સ સપદિ લભતે તત્દ્વન્દ્વરત્નપ્રસાદમ્ ॥ ૧૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીરાધિકાયાઃ પ્રેમપૂરાભિધસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Shrigranthakartuh Prarthana ॥ શ્રીશ્રીગ્રન્થકર્તુઃ પ્રાર્થના ॥

સુબલસખાધરપલ્લવ
 સમુદિતમધુમુગ્ધમધુરીલુબ્ધામ્ ।
રુચિજિતકઞ્ચનચિત્રાં
 કાઞ્ચન ચિત્રાં પિકીં વન્દે ॥ ૧॥

વૃષરવિજાધરાબિમ્બી
 ફલરસપાનોત્કમદ્ભુતં ભ્રમરમ્ ।
ધૃતશિખિપિઞ્છકચૂલં
 પીતદુકૂલં ચિરં નૌમિ ॥ ૨॥

જિતઃ સુધાંશુર્યશસા મમેતિ
 ગર્વં મૂઢ મા બત ગોષ્ઠવીર ।
તવારિનરીનયનામ્બુપાલી
 જિગાય તાતં પ્રસભં યતોऽસ્ય ॥ ૩॥

કુઞ્જે કુઞ્જે પશુપવનિતાવાહિનીભિઃ સમસ્તા-
 ત્સ્વૈરં કૃષ્ણઃ કુસુમધનુષો રાજ્યચર્ચાં કરોતુ ।
એતત્પ્રાર્થ્યં સખિ મમ યથા ચિત્તહારી સ ધૂર્તો
 બદ્ધં ચેતસ્ત્યજતિ કિમુ વા પ્રાણમોષાં કરોતિ ॥ ૪॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
 શ્રીશ્રીગ્રન્થકર્તુઃ પ્રાર્થના સમાપ્તા ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Svaniyamadashakam ॥ સ્વનિયમદશકમ્ ॥

ગુરૌ મન્ત્રે નામ્નિ પ્રભુવરશચીગર્ભજપદે
    સ્વરૂપે શ્રીરૂપે ગણયુજિ તદીયપ્રથમજે ।
ગિરીન્દ્રે ગાન્ધર્વાસરસિ મધુપુર્યાં વ્રજવને
    વ્રજે ભક્તે ગોષ્ઠાલયિષુ પરમાસ્તાં મમ રતિઃ ॥ ૧॥

ન ચાન્યત્ર ક્ષેત્રે હરિતનુસનાથેઽપિ સુજના-
    દ્રસાસ્વાદં પ્રેમ્ણા દધદપિ વસામિ ક્ષણમપિ ।
સમં ત્વેતદ્ગ્રામ્યાવલિભિરભિતન્વન્નપિ કથાં
    વિધાસ્યે સંવાસં વ્રજભુવન એવ પ્રતિભવમ્ ॥ ૨॥

સદા રાધાકૃષ્ણોચ્છલદતુલખેલાસ્થલયુગં
    વ્રજં સન્ત્યજ્યૈતદ્યુગવિરહિતોઽપિ ત્રુટિમપિ ।
પુનર્દ્વારાવત્યાં યદુપતિમપિ પ્રૌઢવિભવૈઃ
    સ્ફુરન્તં તદ્વાચાપિ ચ ન હિ ચલામીક્ષિતુમપિ ॥ ૩॥

ગતોન્માદૈ રાધા સ્ફુરતિ હરિણા શ્લિષ્ટહૃદયા
    સ્ફુટં દ્વારાવત્યામિતિ યદિ શ‍ૃણોમિ શ્રુતિતટે ।
તદાહં તત્રૈવોદ્ધતમતિ પતામિ વ્રજપુરા-
    ત્સમુડ્ડીય સ્વાન્તાધિકગતિખગેન્દ્રાદપિ જવાત્ ॥ ૪॥

અનાદિઃ સાદિર્વા પટુરતિમૃદુર્વા પ્રતિપદ
    પ્રમીલત્કારુણ્યઃ પ્રગુણકરુણાહીન ઇતિ વા ।
મહાવૈકુણ્ઠેશાધિક ઇહ નરો વા વ્રજપતે-
    રયં સૂનુર્ગોષ્ઠે પ્રતિજનિ મમાસ્તાં પ્રભુવરઃ ॥ ૫॥

અનાદૃત્યોદ્ગીતામપિ મુનિગણૈર્વૈણિકમુખૈઃ
    પ્રવીણાં ગાન્ધર્વામપિ ચ નિગમૈસ્તત્પ્રિયતમામ્ ।

ય એકં ગોવિન્દં ભજતિ કપટી દામ્ભિકતયા
    તદભ્યર્ણે શીર્ણે ક્ષણમપિ ન યામિ વ્રતમિદમ્ ॥ ૬॥

અજાણ્ડે રાધેતિસ્ફુરદભિધયા સિક્તજનન્યા-
    નયા સાકં કૃષ્ણં ભજતિ ય ઇહ પ્રેમનમિતઃ ।
પરં પ્રક્ષાલ્યતચ્ચરણકમલે તજ્જલમહો
    મુદા પીત્વા શશ્વચ્છિરસિ ચ વહામિ પ્રતિદિનમ્ ॥ ૭॥

પરિત્યક્તઃ પ્રેયોજનસમુદયૈર્બાઢમસુધી-
    ર્દુરન્ધો નીરન્ધ્રં કદનભરવાર્ધ્ધૌ નિપતિતઃ ।
તૃણં દન્તૈર્દૃષ્ટ્વા ચટુભિરભિયાચેઽદ્ય કૃપયા
    સ્વયં શ્રીગાન્ધર્વા સ્વપદનલિનાન્તં નયતુ મામ્ ॥ ૮॥

વ્રજોત્પન્નક્ષીરાશનવસનપાત્રાદિભિરહં
    પદાર્થૈર્નિર્વાહ્ય વ્યવહૃતિમદમ્ભં સનિયમઃ ।
વસામીશાકુણ્ડે ગિરિકુલવરે ચૈવ સમયે
    મરિષ્યે તુ પ્રેષ્ઠે સરસિ ખલુ જીવાદિપુરતઃ ॥ ૯॥

સ્ફુરલ્લક્ષ્મીવ્રજવિજયિલક્ષ્મીભરલસ-
    દ્વપુઃશ્રીગાન્ધર્વાસ્મરનિકરદીવ્યદ્ગિરિભૃતોઃ ।
વિધાસ્યે કુઞ્જાદૌ વિવિધવરિવસ્યાઃ સરભસં
    રહઃ શ્રીરૂપાખ્યપ્રિયતમજનસ્યૈવ ચરમઃ ॥ ૧૦॥

કૃતં કેનાપ્યેતન્નિજનિયમશંસિસ્તવમિમં
    પઠેદ્યો વિશ્રદ્ધઃ પ્રિયયુગલરૂપેઽર્પિતમનાઃ ।
દૃઢં ગોષ્ઠે હૃષ્ટો વસતિવસતિં પ્રાપ્ય સમયે
    મુદા રાધાકૃષ્ણૌ ભજતિ સ હિ તેનૈવ સહિતઃ ॥ ૧૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        સ્વનિયમદશકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shriradhikashtottarashatanamastotram ॥ શ્રીરાધિકાષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

અવીક્ષ્યાત્મેશ્વરીં કાચિદ્વૃન્દાવનમહેશ્વરીમ્ ।
તત્પદામ્ભોજમાત્રૈકગતિર્દાસ્યતિકાતરા ॥ ૧॥

પતિતા તત્સરસ્તીરે રુદત્યર્તરવાકુલમ્ ।
તાચ્છ્રીવક્ત્રેક્ષણાવાસ્યૈ નામાન્યેતાનિ સઞ્જગૌ ॥ ૨॥

રાધા ગાન્ધર્વિકા ગોષ્ઠયુવરાજૈકકામિતા ।
ગાન્ધર્વા રાધિકા ચન્દ્રકાન્તિર્માધવસઙ્ગિની ॥ ૩॥

દામોદરાદ્વૈતસખી કાર્ત્તિકોત્કીર્તિદેશ્વરી ।
મુકુન્દદયિતાવૃન્દધમ્મિલ્લમણિમઞ્જરી ॥ ૪॥

ભસ્કરોપાસિકા વાર્ષભાનવી વૃષભાનુજા ।
અનઙ્ગમઞ્જરીજ્યેષ્ઠા શ્રીદામાવરજોત્તમા ॥ ૫॥

કીર્તિદાકન્યકા માતૃસ્નેહપીયૂષપુત્રિકા ।
વિશાખાસવયઃ પ્રેષ્ઠવિશાખાજીવિતાધિકા ॥ ૬॥

પ્રાણાદ્વિતીયલલિતા વૃન્દાવનવિહારિણી ।
લલિતાપ્રાણલક્ષૈકરક્ષા વૃન્દાવનેશ્વરી ॥ ૭॥

વ્રજેન્દ્રગૃહિનીકૃષ્ણપ્રાયસ્નેહનિકેતનમ્ ।
વ્રજગોગોપગોપાલીજીવમાત્રૈકજીવનમ્ ॥ ૮॥

સ્નેહલાભીરરાજેન્દ્રવત્સલાચ્યુતપૂર્વજા ।
ગોવિન્દપ્રણયાધારસુરભિસેવનોત્સુકા ॥ ૯॥

ધૃતનન્દીશ્વરક્ષેમગમનોત્કણ્ઠિમાનસા ।
સ્વદેહાદ્વૈતતાદૃષ્ટિધનિષ્ઠાધ્યેયદર્શના ॥ ૧૦॥

ગોપેન્દ્રમહિષીપાકશાલવેદિપ્રકાશિકા ।
આયુર્વર્ધકરદ્ધાન્ના રોહિણીઘ્રાતમસ્તકા ॥ ૧૧॥

સુબલન્યસ્તસારૂપ્યા સુબલપ્રીતિતોષિતા ।
મુખરાદૃક્સુધાનપ્ત્રી જટિલાદૃષ્ટિભીષિતા ॥ ૧૨॥

મધુમઙ્ગલનર્મોક્તિજનિતસ્મિતચન્દ્રિકા ।
પરુણમાસીબહિઃખેલત્પ્રાણપઞ્જરશારિકા ॥ ૧૩॥

સ્વગણાદ્વૈતજીવાતુઃ સ્વીયાહઙ્કુરવર્ધિની ।
સ્વગણોપેન્દ્રપાદાબ્જસ્પર્શલમ્ભનહર્ષિણી ॥ ૧૪॥

સ્વીયવૃન્દાવનોદ્યાનપાલિકીકૃતવૃન્દકા ।
જ્ઞાતવૃન્દાટવીસર્વલતાતરુમૃગદ્વિજા ॥ ૧૫॥

ઈષાચન્દનસઙ્ઘૃષ્ટનવકાશ્મીરદેહભાઃ ।
જવાપુષ્પપ્રભાહારિપટ્ટચીનારુણામ્બરા ॥ ૧૬॥

ચરણાબ્જતલજ્યોતિરરુણીકૃતભૂતલા ।
હરિચિત્તચમત્કારી ચારુનૂપુરનિઃસ્વના ॥ ૧૭॥

કૃષ્ણશ્રાન્તિહરશ્રોણીપીઠવલ્ગિતઘણ્ટિકા ।
કૃષ્ણસર્વસ્વપીનોદ્યત્કુચાઞ્ચન્મણિમાલિકા ॥ ૧૮॥

નાનારત્નોલ્લસાછઙ્ખચૂડાચારુભુજદ્વયા ।
સ્યમન્તકમણિભ્રાજન્મણિબન્ધાતિબન્ધુરા ॥ ૧૯॥

સુવર્ણદર્પનજ્યોતિરુલ્લઙ્ઘિમુખમણ્ડલા ।
પક્વદાડિમબીજાભદન્તાકૃષ્ટાઘભીછુકા ॥ ૨૦॥

અબ્જરાગાદિસૃષ્ટાબ્જકલિકાકર્ણભૂષણા ।
સૌભાગ્યકજ્જલાઙ્કાક્તાનેત્રનિન્દિતખઞ્જના ॥ ૨૧॥

સુવૃત્તમૌક્તિકમુક્તાનાસિકાટિલપુષ્પિકા ।
સુચારુનવકસ્તૂરીતિલકાઞ્ચિતભાલકા ॥ ૨૨॥

દિવ્યવેણીવિનિર્ધૂતકેકિપિઞ્છાવરસ્તુતિઃ ।
નેત્રાન્તશરવિધ્વંસિકૃતચાણૂરજિદ્ધૃતિઃ ॥ ૨૩॥

સ્ફુરત્કૈશોરતારુણ્યસન્ધિબન્ધુરવિગ્રહા ।
માધવોલ્લાસકોન્મત્તા પિકોરુમધુરસ્વરા ॥ ૨૪॥

પ્રાણાયુતશતપ્રેષ્ઠમાધવોત્કીર્તિલમ્પટા ।
કૃષ્ણાપઙ્ગતરઙ્ગોદ્યત્સ્મિતપીયૂષબુદ્બુદા ॥ ૨૫॥

પુઞ્જીભૂતજગલ્લજ્જાવૈદગ્ધીદિગ્ધવિગ્રહા ।
કરુણવિદ્રવદ્દેહા મૂર્તિમન્માધુરીઘટા ॥ ૨૬॥

જગદ્ગુણવતીવર્ગગીયમાનગુણોચ્ચયા ।
શચ્યાદિસુભગવૃન્દવન્દ્યમાનોરુસૌભગા ॥ ૨૭॥

વીણાવાદનસઙ્ગીતરાસલાસ્યવિશારદા ।
નારદપ્રમુખોદ્ગીતજગદાનન્દસદ્યશઃ ॥ ૨૮॥

ગોવર્ધનગુહાગેહગૃહિણી કુઞ્જમણ્ડના ।
ચણ્ડાંશુનન્દિનીબદ્ધભાગિનીભાવવિભ્રમા ॥ ૨૯॥

દિવ્યકુન્દલતાનર્મસખ્યદામવિભૂષિતા ।
ગોવર્ધનધરાહ્લાદિશૃઙ્ગારરસપણ્ડિતા ॥ ૩૦॥

ગિરીન્દ્રધરવક્ષઃશ્રીશઙ્ખચૂડારિજીવનમ્ ।
ગોકુલેન્દ્રસુતપ્રેમકામભૂપેન્દ્રપટ્ટનમ્ ॥ ૩૧॥

વૃષવિધ્વંસનર્મોક્તિસ્વનિર્મિતસરોવરા ।
નિજકુણ્ડજલક્રીડાજિતસઙ્કર્ષણાનુજા ॥ ૩૨॥

મુરમર્દનમત્તેભવિહારામૃતદીર્ઘિકા ।
ગિરીન્દ્રધારપારીન્દ્રરતિયુદ્ધોરુસિંહિકા ॥ ૩૩॥

સ્વતનુસૌરભોન્મત્તીકૃતમોહનમાધવા ।
દોર્મૂલોચ્ચલનક્રીડાવ્યાકુલીકૃતકેશવા ॥ ૩૪॥

નિજકુણ્ડતટીકુઞ્જક્લૃપ્તકેલિકલોદ્યમા ।
દિવ્યમલ્લિકુલોલ્લાસિશય્યાકલ્પિતવિગ્રહા ॥ ૩૫॥

કૃષ્ણવામભુજાન્યસ્તચારુદક્ષિણગણ્ડકા ।
સવ્યબાહુલતાબદ્ધકૃષ્ણદક્ષિણસદ્ભુજા ॥ ૩૬॥

કૃષ્ણદક્ષિણચારૂરુશ્લિષ્ટવામોરુરમ્ભિકા ।
ગિરીન્દ્રધરધૃગ્વક્ષોમર્દિસુસ્તનપર્વતા ॥ ૩૭॥

ગોવિન્દાધરપીયૂષવાસિતાધરપલ્લવા ।

સુધાસઞ્ચયચારૂક્તિશીતલીકૃતમાધવા ॥ ૩૮॥

ગોવિન્દોદ્ગીર્ણતામ્બૂલરાગરાજ્યત્કપોલિકા ।
કૃષ્ણસમ્ભોગસફલીકૃતમન્મથસમ્ભવા ॥ ૩૯॥

ગોવિન્દમાર્જિતોદ્દામરતિપ્રસ્વિન્નસન્મુખા ।
વિશાખાવીજિતક્રીડાશ્રાન્તિનિદ્રાલુવિગ્રહા ॥ ૪૦॥

ગોવિન્દચરણન્યસ્તકાયમાનસજીવના ।
સ્વપ્રાનાર્બુદનિર્મઞ્છ્યહરિપાદરજઃકણા ॥ ૪૧॥

અણુમાત્રાચ્યુતાદર્શશપ્યમાનાત્મલોચના ।
નિત્યનૂતનગોવિન્દવક્ત્રશુભ્રાંશુદર્શના ॥ ૪૨॥

નિઃસીમહરિમાધુર્યસૌન્દર્યાદ્યેકભોગિની ।
સાપત્ન્યધામમુરલીમાત્રાભાગ્યકટાક્ષિણી ॥ ૪૩॥

ગાઢબુદ્ધિબલક્રીડાજિતવંશીવિકર્ષિણી ।
નર્મોક્તિચન્દ્રિકોત્ફુલ્લકૃષ્ણકામાબ્ધિવર્ધિની ॥ ૪૪॥

વ્રજચન્દ્રેન્દ્રિયગ્રામવિશ્રામવિધુશાલિકા ।
કૃષ્ણસર્વેન્દ્રિયોન્માદિરાધેત્યક્ષરયુગ્મકા ॥ ૪૫॥

ઇદં શ્રીરાધિકાનામ્નામષ્ટોત્તરશતોજ્જ્વલમ્ ।
શ્રીરાધાલમ્ભકં નામ સ્તોત્રં ચારુ રસાયનમ્ ॥ ૪૬॥

યોઽધીતે પરમપ્રીત્યા દીનઃ કતરમાનસઃ ।
સ નાથમચિરેણૈવ સનાથમીક્ષતે ધ્રુવમ્ ॥ ૪૭॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીરાધિકાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Radhikashtakam ॥ રાધિકાષ્ટકમ્ રઘુનાથદાસગોસ્વામિ ॥

રસવલિતમૃગાક્ષીમૌલિમાણિક્યલક્ષ્મીઃ
પ્રમુદિતમુરવૈરિપ્રેમવાપીમરાલી ।
વ્રજવરવૃષભાનોઃ પુણ્યગીર્વાણવલ્લી
સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૧॥

સ્ફુરદરુણદુકૂલદ્યોઇતોદ્યન્નિતમ્બ
સ્થલમભિ વરકાઞ્ચિલાસ્યમુલ્લાસયન્તી ।
કુચકલસવિલાસસ્ફીતમુક્તાસરશ્રીઃ
સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૨॥

સરસિજવરગર્ભાખર્વકાન્તિઃ સમુદ્ય-
ત્તરુણિમઘનસારાશ્લિષ્ટકૈશોરસીધુઃ ।
દરવિકસિતહાસ્યસ્યન્દિબિમ્બાધરાગ્રા
સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૩॥

અતિચટુલતરં તં કાનનાન્તર્મિલન્તં
વ્રજનૃપતિકુમારં વીક્ષ્ય શઙ્કાકુલાક્ષી ।
મધુરમૃદુવચોભિઃ સંસ્તુતા નેત્રભઙ્ગ્યા
સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૪॥

વ્રજકુલમહિલાનાં પ્રાણભૂતાખિલાનાં
પશુપપતિગૃહિણ્યાઃ કૃષ્ણવત્પ્રેમપાત્રમ્ ।
સુલલિતલલિતાન્તઃસ્નેહફુલ્લાન્તરાત્મા
સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૫॥

નિરવધિ સવ્વિશાખા શાખિયૂથપ્રસૂનૈઃ
સ્રજમિહ રચયન્તી વૈજયન્તીં વનાન્તે ।

અઘવિજયવરોરઃપ્રેયસી શ્રેયસી સા
    સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૬॥

પ્રકટિતનિજવાસં સ્નિગ્ધવેણુપ્રસાદૈ-
    ર્દ્રુતગતિહરિમારાત્પ્રાપ્ય કુઞ્જે સ્મિતાક્ષી ।
શ્રવણકુહરકુણ્ડં તન્વતી નમ્રવક્ત્રા
    સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૭॥

અમલકમલરાજિસ્પર્શિવાતપ્રશીતે
    નિજસરસિ નિદાઘે સાયમુલ્લાસિનીયમ્ ।
પરિજનગણયુક્તા ક્રીડયન્તી બકારિં
    સ્નપયતિ નિજદાસ્યે રાધિકા માં કદા નુ ॥ ૮॥

પઠતિ વિમલચેતા મૃષ્ટરાધાષ્ટકં યઃ
    પરિહૃતનિખિલાશાસન્તતિઃ કાતરઃ સન્।
પશુપપતિકુમારઃ કામમામોદિતસ્તં
    નિજજનગણમધ્યે રાધિકાયાસ્તનોતિ ॥ ૯॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીરાધિકાષ્ટકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Premambhojamarandastavarajah ॥ પ્રેમામ્ભોજમરન્દસ્તવરાજઃ ॥

મહાભાવોજ્જ્વલચ્ચિન્તારત્નોદ્ભાવિતવિગ્રહામ્ ।
સખીપ્રણયસદ્ગન્ધવરોદ્વર્તનસુપ્રભામ્ ॥ ૧॥

કારુણ્યામૃતવીચિભિસ્તારુણ્યામૃતધારયા ।
લાવણ્યામૃતવન્યાભિઃ સ્નપિતાં ગ્લપિતેન્દિરામ્ ॥ ૨॥

હ્રીપટ્ટવસ્ત્રગુપ્તાઙ્ગીં સૌન્દર્યઘુસૃણાઞ્ચિતામ્ ।
શ્યામલોજ્જ્વલકસ્તૂરીવિચિત્રિતકલેવરામ્ ॥ ૩॥

કમ્પાશ્રુપુલકસ્તમ્ભસ્વેદગદ્ગદરક્તતાઃ ।
ઉન્માદો જાડ્યમિત્યેતૈ રત્નૈર્નવભિરુત્તમૈઃ ॥ ૪॥

ક્લૃપ્તાલઙ્કૃતિસંસ્લિષ્ટાં ગુણાલીપુષ્પમાલિનીમ્ ।
ધીરાધીરાત્વસદ્વાસપટવાસૈઃ પરિષ્કૃતામ્ ॥ ૫॥

પ્રચ્છન્નમાનધમ્મિલ્લાં સૌભાગ્યતિલકોજ્જ્વલામ્ ।
કૃષ્ણનામયશઃશ્રાવવતંસોલ્લાસિકર્ણિકામ્ ॥ ૬॥

રાગતામ્બૂલરક્તૌષ્ઠીં પ્રેમકૌટિલ્યકજ્જલામ્ ।
નર્મભાષિતનિસ્યન્દસ્મિતકર્પૂરવાસિતામ્ ॥ ૭॥

સૌરભાન્તઃપુરે ગર્વપર્યઙ્કોપરિ લીલયા ।
નિવિષ્ટાં પ્રેમવૈચિત્ત્યવિચલત્તરલાઞ્ચિતામ્ ॥ ૮॥

પ્રણયક્રોધસચ્ચોલીબન્ધગુપ્તીકૃતસ્તનામ્ ।
સપત્નીવક્ત્રહૃચ્છોષિયશઃશ્રીકચ્છપીવરામ્ ॥ ૯॥

મધ્યતાત્મસખીસ્કન્ધલીલાન્યસ્તકરામ્બુજામ્ ।
શ્યામાં શ્યામસ્મરામોદમધુલીપરિવેશિકામ્ ॥ ૧૦॥

ત્વાં નત્વા યાચતે ધૃત્વા તૃણં દન્તૈરયં જનઃ ।

સ્વદાસ્યામૃતસેકેન જીવયામું સુદુઃખિતમ્ ॥ ૧૧॥

ન મુઞ્ચેચ્છરણાયાતમપિ દુષ્ટં દયામયઃ ।
અતો ગાન્ધર્વિકે હા હા મુઞ્ચૈનં નૈવ તાદૃશમ્ ॥ ૧૨॥

પ્રેમામ્ભોજમરન્દાખ્યં સ્તવરાજમિમં જનઃ ।
શ્રીરાધિકાકૃપાહેતું પઠંસ્તદ્દાસ્યમાપ્નુયાત્ ॥ ૧૩॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
પ્રેમામ્ભોજમરન્દસ્તવરાજઃ સમ્પૂર્ણઃ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Svasankalpaprakashastotram ॥ સ્વસઙ્કલ્પપ્રકાશસ્તોત્રમ્ ॥

અનારાધ્ય રાધાપદામ્ભોજરેણું
    અનાશ્રિત્ય વૃન્દાટવીં તત્પદાઙ્કામ્ ।
અસમ્ભાષ્ય તદ્ભાવગમ્ભીરચિત્તા-
    ન્કુતઃ શ્યામસિન્ધૌ રસસ્યાવગાહઃ ॥ ૧॥

નવં દિવ્યં કાવ્યં સ્વકૃતમતુલં નાટકકુલં
    પ્રહેલીર્ગૂઢાર્થાઃ સખિ રુચિરવીણાધ્વનિગતીઃ ।
કદા સ્નેહોલ્લાસૈર્લલિતલલિતાપ્રેરણબલા-
    ત્સલજ્જં ગાન્ધર્વા સરસમસકૃચ્છિક્ષયતિ મામ્ ॥ ૨॥

અલં માનગ્રન્થેર્નિભૃતચટુમોક્ષાય નિભૃતં
    મુકુન્દે હા હેતિ પ્રથયતિ નિતાન્તં મયિ જને ।
તદર્થં ગાન્ધર્વાચરણપતિતં પ્રેક્ષ્ય કુટિલં
    કદા પ્રેમક્રૌર્યાત્પ્રખરલલિતા ભર્ત્સયતિ મામ્ ॥ ૩॥

મુદા વૈદગ્ધ્યાન્તર્લલિતનવકર્પૂરમિલન
    સ્ફુરન્નાનાનર્મોત્કરમધુરમાધ્વીકરચને ।
સગર્વં ગાન્ધર્વાગિરિધરકૃતે પ્રેમવિવશા
    વિશાખા મે શિક્ષાં વિતરતુ ગુરુસ્તદ્યુતસખી ॥ ૪॥

કુહૂકણ્ઠીકણ્ઠાદપિ કમનકણ્ઠી મયિ પુન-
    ર્વિશાખા ગાનસ્યાપિ ચ રુચિરશિક્ષાં પ્રણયતુ ।
યથાહં તેનૈતદ્યુવયુગલમુલ્લાસ્ય સગણા-
    લ્લેભે રાસે તસ્માન્મણિપદકહારાનિહ મુહુઃ ॥ ૫॥

ક્વચિત્કુઞ્જે કુઞ્જે છલમિલિતગોપાલમનુ તાં
    મદીશાં મધ્યાહ્ને પ્રિયતરસખીવૃન્દવલિતામ્ ।

સુધાજૈત્રૈરન્નૈઃ પચનરસવિચ્ચમ્પકલતા
    કૃતોદ્યચ્છિક્ષોઽહં જન ઇહ કદા ભોજયતિ ભોઃ ॥ ૬॥

ક્વચિત્કુઞ્જક્ષેત્રે સ્મરવિષમસઙ્ગ્રામગરિમ
    ક્ષરચ્ચિત્રશ્રેણીં વ્રજયુવયુગસ્યોત્કટમદૈઃ ।
વિધત્તે સોલ્લાસં પુનરસમયં પર્ણકચયૈ-
    ર્વિચિત્રં ચિત્રાતઃ સખિ કલિતશિક્ષોઽપ્યનુ જનઃ ॥ ૭॥

પરં તુઙ્ગાદ્યા યૌવતસદસિ વિદ્યાદ્ભુતગુણૈઃ
    સ્ફુટં જિત્વા પદ્માપ્રભૃતિનવનારીર્ભ્રમતિ યા ।
જનોઽયં સમ્પાદ્ય સખિ વિવિધવિદ્યાસ્પદતયા
    તયા કિં શ્રીનાથાચ્છલનિહિતનેત્રેઙ્ગિતલવૈઃ ॥ ૮॥

સ્ફુરન્મુક્તાગુઞ્જામણિસુમનસાં હારરચને
    મુદેન્દોર્લેખા મે રચયતુ તથા શિક્ષણવિધિમ્ ।
યથા તૈઃ સઙ્ક્લૃપ્તૈર્દયિતસરસીમધ્યસદને
    સ્ફુટં રાધાકૃષ્ણાવયમપિ જનો ભૂષયતિ તૌ ॥ ૯॥

અયે પૂર્વં રઙ્ગેત્યમૃતમયવર્ણદ્વયરસ
    સ્ફુરદ્દેવીપ્રાર્થ્યં નટનપટલં શિક્ષયતિ ચેત્ ।
તદા રાસે દૃશ્યં રસવલિતલાસ્યં વિદધતો-
    સ્તયોર્વક્ત્રે યુઞ્જે નટનપટુવીટિં સખિ મુહુઃ ॥ ૧૦॥

સદક્ષક્રીડાનાં વિધિમિહ તથા શિક્ષયિતું સા
    સુદેવી મે દિવ્યં સદસિ સુદૃશાં ગોકુલભુવામ્ ।
તયોર્દ્વન્દ્વે ખેલામથ વિદધતોઃ સ્ફૂર્જતિ તથા
    કરોમિ શ્રીનાથાં સખિ વિજયિનીં નેત્રકથનૈઃ ॥ ૧૧॥

રહઃ કીરદ્વારાપ્યતિવિષમગૂઢાર્થરચનં
    દલે પાદ્મે પદ્યં પ્રહિતમુદયચ્ચાટુહરિણા ।
સમગ્રં વિજ્ઞાયાચલપતિવલત્કન્દરપદે
    તદભ્યર્ણે નેષ્યે દ્રુતમતિ મદીશાં નિશિ કદા ॥ ૧૨॥

અદભ્રં બિભ્રાણૌ સ્મરરણભરં કન્દરખલે
    મિથો જેતું વિદ્ધાવપિ નિશિતનેત્રાઞ્ચલશરૈઃ ।
અપિ ક્લિદ્યદ્ગાત્રૌ નખદશનશસ્ત્રૈરપિ દરા
    ત્યજન્તૌ દ્રષ્ટું તૌ કિમુ તમસિ વત્સ્યામિ સમયે ॥ ૧૩॥

સમાનં નિર્વાહ્ય સ્મરસદસિ સઙ્ગ્રામમતુલં
    તદાજ્ઞાતઃ સ્થિત્વા મિલિતતનુ નિદ્રાં ગતવતોઃ ।
તયોર્યુગ્મં યુક્ત્યા ત્વરિતમભિસઙ્ગમ્ય કુતુકા-
    ત્કદાહં સેવિષ્યે સખિ કુસુમપુઞ્જવ્યજનભાક્ ॥ ૧૪॥

મુદા કુઞ્જે ગુઞ્જદ્ભ્રમરનિકરે પુષ્પશયનં
    વિધાયારાન્માલાઘુસૃણમધુવીટીવિરચનમ્ ।
પુનઃ કર્તું તસ્મિન્સ્મરવિલસિતાન્યુત્કમનસો-
    સ્તયોસ્તોષાયાલં વિધુમુખિ વિધાસ્યામિ કિમહમ્ ॥ ૧૫॥

જિતોન્મીલન્નીલોત્પલરુચિનિ કાન્ત્યોરસિ હરે-
    ર્નિકુઞ્જે નિદ્રાણાં દ્યુતિવિજિતગાઙ્ગેયગુરુતામ્ ।
કદા દૃષ્ટ્વા રાધાં નભસિ નવમેઘે સ્થિરતયા
    વલદ્વિદ્યુલ્લક્ષ્મ્યાં મુહુરિહ દધે થુત્કૃતિમહમ્ ॥ ૧૬॥

વિલાસે વિસ્મૃત્ય સ્ખલિતમુરુરઙ્ગૈર્મણિસરં
    દ્રુતં ભીત્યાગત્ય પ્રિયતમસખીસંસદિ હ્રિયા ।
તમાનેતું સ્મિત્વા તદવિદિતનેત્રાન્તનટનૈઃ
    કદા શ્રીમન્નાથા સ્વજનમચિરાત્પ્રેરયતિ મામ્ ॥ ૧૭॥

ક્વચિત્પદ્માશૈવ્યાદિકવલિતચન્દ્રાવલિમુરુ
    પ્રિયાલાપોલ્લાસૈરતુલમપિ ધિન્વન્નઘહરઃ ।
કદા વા મત્પ્રેક્ષાલવકલિતવૈલક્ષ્યભરતઃ
    ક્વ રાધેત્યાજલ્પન્મલિનયતિ સર્વાઃ પરમિમાઃ ॥ ૧૮॥

સગર્વાઃ સંરુદ્ધ્ય પ્રખરલલિતાદ્યાઃ સહચરી-
    સ્તતો દાનં દર્પાત્સખિ મૃગયતા સ્વં ગિરિભૃતા ।
વિશાખા મન્નાથાનયનનટનપ્રેરણબલા-
    દ્વિધૃત્યારાન્નીતા રુષમિહ દધાના ક્ષિપતુ નઃ ॥ ૧૯॥

સ્તનૌ શૈલપ્રાયાવપિ તવ નિતમ્બો રથસમઃ
    સ્ફુટં જીર્ણા નૌર્મે કલય તટિનીં વાતવિષમામ્ ।
કથં પારં ગચ્છેરિહ નિવસ રાત્રાવિતિ હરે-
    ર્વચઃ શ્રુત્વા રાધા કપટકુપિતા સ્મેરયતુ મામ્ ॥ ૨૦॥

ઇદં સ્વાન્તે ભુઞ્જે કદલમપિ યદ્રઙ્ગણલતા

ભિધૈકસ્વર્વલ્લીપવનલભનેનૈવ ફલિતમ્ ।
તદભ્યાસે સ્ફૂર્જન્મદનસુભગં તદ્ધુવયુગં
ભજિષ્યે સોલ્લાસં પ્રિયજનગણૈરિત્થમિહ કિમ્ ॥ ૨૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
સ્વસઙ્કલ્પપ્રકાશસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Shriradhakrishnojjvalakusumakelih ॥
## શ્રીશ્રીરાધાકૃષ્ણોજ્જ્વલકુસુમકેલિઃ ॥

સખીવૃન્દૈર્વૃન્દાર્ચિતમુદિતવૃન્દાવનપદં
    વિનોદેનાસાદ્ય પ્રિયકુસુમપાત્રાઙ્કુરફલમ્ ।
હરન્ત્યાં રાધાયાં ધ્વનિભિરભિસઙ્ગમ્ય ગિરિભૃ-
    દ્ધૃતાટોપં તાભિઃ સહ વિવદમાનોઽવદદિદમ્ ॥ ૧॥

રહઃ પાટચ્ચર્યઃ કુરુત કિમિદં યૌવતમદા-
    ત્સ્ફુટં યુષ્માભિર્મે વિપિનમપણં નાશિતમદઃ ।
અતો વલ્લર્યર્થે તનુતટિમવશ્યં ફલકૃતે
    કુચાન્વો લુણ્ઠામઃ કિસલયપદે ચાધરકુલમ્ ॥ ૨॥

ઇતિ નિશમ્ય ભ્રુભઙ્ગમવલોકન્ત્યાં લલિતાયામન્યાઃ સસ્મિતમૂચુઃ
વદન્ત્યઃ સ્મો નૂનં તવ કિટવ સત્યં હિતમિદં
    વૃથાટોપં હિત્વા વ્રજ ઝટટિ નન્દીશ્વરપુરમ્ ।
ન જાનીષે કિં તં પ્રખરલલિતાવિક્રમતટિં
    યયા તે વાન્યાન્તઃ ક્ષપિતમસકૃત્પૌરુષયશઃ ॥ ૩॥

ઇતિ વિશાખાકથિતમાકર્ણ્ય સદર્પાભિનયં કૃષ્ણઃ પુનઃ પ્રાહ
અહો શિષ્યા એવં હિ કુરુત ધાર્ષ્ટ્યં મયિ પુન-
    ર્યથા શ્રુત્વા ક્રુધ્યન્ત્યખિલલતિકામણ્ડનવરઃ ।
મયા કામં યત્ર પ્રગુણગુરુણા યત્કરુણયા
    વિતીર્ણા વો દીક્ષા ન કિલ કતિધા જૈનરચિતાઃ ॥ ૪॥

એતન્નિશમ્ય લજ્જયા કોપમિવ વિવૃણ્વતીષુ સર્વાસુ
પ્રસઙ્ગાન્તરેણ તં વિજેતું વિશાખા સન્યાસમાહ
સ્વયં યો નિર્બન્ધાદ્ધનવિતરણૈર્લોકતટિભિઃ

કરોત્યારામં યં સ હિ ભવતિ તસ્યૈવ નિયતમ્ ।
ઇદં તુ શ્રીવૃન્દાવનમકૃતમન્યૈરનુદિનં
સમાનં સર્વેષાં કથમિવ તવૈવાદ્ય ભવિતા ॥ ૫॥

ઇતિ વિશાખાસન્યાયકથિતમાકર્ણ્ય સદર્પાભિનયં શ્રીકૃષ્ણઃ પુનઃ પ્રાહ
અકુણ્ઠં વૈકુણ્ઠે દિવિ ભુવિ ચ રસાયાં શ્રુતિગણૈઃ
પ્રગીતં મન્નામ્ના વનમિતિ ન યદ્વઃ શ્રુતિમિતમ્ ।
ન યુષ્મદ્દોષોઽસ્મિન્પ્રબલમદગર્વોત્તરુણતા
ત્રિદોષિ બાધિર્યં પ્રચુરમકરોદ્યત્સ્ફુટમિદમ્ ॥ ૬॥

એતદાકર્ણ્ય તિર્યગ્વિલોકયન્તી રાધા સસ્મિતમુવાચ
અયે ચેદ્યન્નામ્નાઙ્કિતમિતિ ભવેત્તસ્ય વિપિનં
તદાસ્મદ્વૃન્દાયા ભવતિ સુતરામેવ કપટિન્।
યતોઽસ્ય નામ્નૈવ ત્રિજગતિ જનૈર્ગીયત ઇહ
સ્વયં ચ શ્રીસ્વામિન્બત તુ ન હિ નામ્ના ક્વચિદપિ ॥ ૭॥

ઇતિ રાધાયાઃ સયુક્તિકવાક્પીયૂષમત્તઃ શ્રીકૃષ્ણઃ સસ્મિતમાહ
ઇયં લક્ષ્મીવૃન્દાદપિ મધુરવૃન્દા મમ વધૂ-
ર્ભવેન્નો ચેદારાત્સશપથમિમં પૃચ્છત સતીમ્ ।
શ્રુતૌ યદ્દમ્પત્યોર્ન હિ ભવતિ ભેદસ્ત્રુટિરતો
દ્વયોર્નૌ નામ્નૈવ ત્રિજગતિ જનો ગાયતિ વનમ્ ॥ ૮॥

ઇતિ શ્રીકૃષ્ણસ્ય વાગમૃતમાપીય રાધા વૃન્દાં પ્રતિ નીચૈરાહ
ઇદં વૃન્દે સત્યં ભવતિ ન હિ કિં વા કથય નઃ
પુરો લજ્જાં હા હા કથમિવ તનોષિ પ્રિયગણે ।
ઋતં ચેત્તદ્દોષચ્છલત ઇવ ગચ્છ ક્ષણમિતો
યથા નાનાવાદૈર્વયમિહ જયામઃ શઠગુરુમ્ ॥ ૯॥

ઇદં કર્ણે તસ્યા નિગદિતવતીષ્વાશુ સહસં
મૃષારોષાદેષા ચલકુટિલચિલ્લીક્ષણતટૈઃ ।
અલં શોણૈરેણીદૃગતિકુટિલાઃ પ્રેક્ષ્ય સખિ તાઃ
સગર્વે ગોવિન્દે પરિષદિ દદાવુત્તરમિદમ્ ॥ ૧૦॥

અયે પદ્માષણ્ડ વ્રજનગરભણ્ડ વ્રજવના-
દિતસ્ત્વં ચેદિચ્છે રુચિરવનરાજત્વમચિરાત્ ।
સખીસ્થલ્યાઃ ષષ્ઠીં ભજ નિજવધૂં તાં કિલ તદા

યથા સા તુષ્ટ્યા તે બદરવનરાજ્યં વિતરતી ॥ ૧૧॥

તત ઇત્થં તત્સૌન્દર્યાદિસ્તવનારભટ્યા શ્રીગાન્ધર્વાયા વૃન્દાટવ્યાં
સ્વતામર્પયન્તી તમુપલભ્ય સોલ્લાસં પુનરાહ
યદેતદ્બિમ્બત્વાલ્લસતિ મુખમસ્યાઃ કમલતો
દૃશોર્દ્વન્દ્વં ચઞ્ચત્કુવલયમૃગાનામિવ ચયાત્ ।
ઉદઞ્ચન્નાસશ્રીઃ શુકનવયુવત્રોટિવલના-
લ્લસદ્બન્ધૂકેભ્યોઽપિ ચ રુચિઘટરાજ્યદધરઃ ॥ ૧૨॥

અયે દન્તાઃ કુન્દાવલીકરકબીજાદિરચના-
દપિ સ્ફીતા ગીતાઃ કુમુદવનતોઽપિ સ્મિતલવઃ ।
શ્રુતિદ્વન્દ્વં મુઞ્જાલલિતગુણપુઞ્જાદપિ પુન-
ર્લલાટોદ્યલ્લક્ષ્મીઃ સુભગબકપુષ્પાદતિતરામ્ ॥ ૧૩॥

ચલાચિલ્લીવલ્લી ભ્રમરવરપઙ્ક્તેરપિ તતઃ
સ્ફુરજ્જમ્બૂપક્વપ્રચુરફલતોઽપ્યેતદલકઃ ।
કચોલ્લાસઃ સ્ફુર્જન્મદશિખિશિખણ્ડાદપિ મધૌ
પિકોત્તાનધ્વાનાદપિ પરમુદારં મૃદુવચઃ ॥ ૧૪॥

નિતમ્બઃ શૈલાનામપિ વિપુલભારાદતિગુરુઃ
કુચૌ તુઙ્ગૌ બિલ્વાદિકફલકુલાદપ્યતિઘનૌ ।
ભુજયુગ્મં ભ્રાજદ્વ્રતતિતતિતોઽપીહ લલિતાં
લલામશ્રીલોમાવલીરપિ ભુજાઙ્ગીતતિરુચેઃ ॥ ૧૫॥

વરોરૂ રમ્ભાલિક્રમરચનજૃમ્ભાદપિ ગતિ-
ર્મરાલીપાલીનામપિ ચલનરઙ્ગાન્મૃદુતરા ।
પદદ્વન્દ્વં ફુલ્લસ્થલકમલવૃન્દાદપિ સદા
વદાન્યત્વં કલ્પદ્રુમનિકરતોઽપિ વ્રજપુરે ॥ ૧૬॥

દૃશોઃ પ્રેમ્ણા શશ્વત્ક્ષરદમૃતનિઃસ્યન્દવિતતિ-
સ્તથા સ્વેદસ્તોમઃ કનકજયિવર્ષપ્રપતિતઃ ।
મનોગઙ્ગાકૃષ્ણાવિવિધસરસીવૃન્દવિચલ-
ત્પ્રવાહાદપ્યુચ્ચૈઃ પુલક ઉત નીપસ્તવકતઃ ॥ ૧૭॥

અલં ગન્ધસ્નિગ્ધા કનકગિરિવન્દ્યા દ્યુતિરપિ
સ્ફુટત્ફુલ્લચમ્પાવલીકનકયૂથીનિવહતઃ
અપિ ભ્રાજદ્વક્ષઃસ્થલમતુલસિંહાસનકુલા-

દપિ ભ્રામ્યન્નેત્રક્રમણનટનં ખઞ્જનગણા-
પરં ચાસ્યાદીનાં વિકસનભરાદેષુ કિલ સ
ક્વચિન્માનાન્મ્લાનેર્બત ભવતિ સૈવૈષ્વિહ યતઃ ।
અતોઽસ્યાશ્છાયૈવ સ્ફુટમટવિરિત્થં ખલુ ભવે-
ત્કથઙ્કારં સ્વામિન્ભવતુ ભવતઃ સામ્પ્રતમિયમ્ ॥ ૧૯॥

અપિ ચ
મુખાદીનાં પદ્માદિકપુરુપદાર્થૈઃ સમરુચઃ
પ્રપન્નાઃ સારૂપ્યં યદતિ વિલસન્તિ સ્ફુટમતઃ ।
અજાણ્ડે વિખ્યાતા પ્રકૃતિમધુરેયં સમગુણા
તતઃ શ્રીરાધાયાઃ પ્રકટમટવીયં પ્રિયસખી ॥ ૨૦॥

વિરાજાછાયાત્વે પ્રકટતરસારૂપ્યવલના-
ત્સખીત્વેઽપિ ક્રીડાસ્પદમટવિરેષા રસમયી ।
સદૈતસ્યા એવ વ્રજભુવિ ભવત્યેવ સુતરાં
યતશ્છાયાસખ્યોઃ સ્ફુરતિ ન હિ ભેદઃ ક્વચિદપિ ॥ ૨૧॥

અદો વૃન્દાનાન્દીસ્તવરસભરૈઃ પોષિતવપુઃ
શ્રિયા પૂર્ણે ઘૂર્ણત્સ્મરનટનતૃષ્ણાતરલિતે ।
અહો રાધોન્મીલન્મનસિજમહાનાટકનટી
નટાચાર્યે તસ્મિન્નટિતુમિવ દૃષ્ટિં સમતનોત્ ॥ ૨૨॥

વિશાખા તુ સ્નેહસ્નપનકૃતરોમઞ્ચવિલસ-
દ્વપુસ્તામાલિઙ્ગ્ય સ્તવરચિતહ્રીશ્રીસ્મિતવૃતામ્ ।
સહાસં દૃગ્ભઙ્ગ્યા ગિરિધરમુપાલભ્ય સહસં
વિનોદૈર્વૃન્દાયાઃ શિરસિ સુમનોવૃષ્ટિમકરોત્ ॥ ૨૩॥

એતન્મધુરવર્ણનાકર્ણનેન સ્વાન્તસ્તોષં બહિર્વિહસ્ય સોત્પ્રાસં કૃષ્ણઃ પુનરાહ
ત્વદાલેરઙ્ગાલી મમ કમનવૃન્દાવનતનોઃ
સદઙ્ગાનાં કુઞ્જાદિકરુચિરનામ્નાં રુચિધનમ્ ।
ધ્રુવં હૃત્વા મ્લાનં પ્રકટમકરોત્તં કથમિમં
ઇદાનીં સારૂપ્યસ્તવનમિષતો રક્ષસિ શઠે ॥ ૨૪॥

તવાલ્યા એવં ચેદતિ ગુણગણા મત્પ્રિયવના-
દપિ શ્રેષ્ઠઃ સુષ્ઠુ ધ્રુવમિહ ભવન્તિ સ્ફુટમમી ।
તદા તુચ્છં પુષ્પં કથમપહરેત્સેયમથવા

સ્વભાવશ્ચૌરાણાં પરધનજિઘૃક્ષુર્ન હિ ચલેત્ ॥ ૨૫॥

પ્રકારૈશ્છાયાતો યદતિવરબિમ્બાસ્ય મહિમા
નમુચ્ચૈર્વિસ્ફાર્ય સ્મરસિ મયિ રાધાં વિતરિતુમ્ ।
કથં તત્સ્યાદ્યસ્માત્પતિપરવશેયં તત ઇમં
સ ચેદારાદ્દદ્યાદ્ભવતિ મમ તર્હ્યેવ મમતા ॥ ૨૬॥

એતદ્વિચિત્રરઙ્ગોચ્છલિતવાગ્ભણિવિલાસસુધાસ્વર્ધુનીતરઙ્ગેનોત્તરલીકૃત-
હૃદ્વૃત્તિદૃઢનૌકં શ્રીરાધાં સસ્મિતમલોકયન્તીષુ
સર્વાસુ સસ્મિતં લલિતા લલાપ
પિપાસાર્થઃ કશ્ચિત્ક્ષુદિતવિવશો વર્ત્મનિ ચલ-
ન્મરુક્ષેત્રે ક્ષારોદકમલભમાનોઽપિ વિરસમ્ ।
સ્વયમ્ભૂસંસ્તવ્યં હરિપુરવરસ્થામપિ સુધાં
પ્રપાતું દ્રાગિચ્છન્જગતિ કિલ હાસ્યાસ્પદમભૂત્ ॥ ૨૭॥

તતો રસિકશેખરં વ્રજરાજકુમારં સ દૃગઞ્ચલવિભ્રમેણ પશ્યન્તી
સખીઃ પ્રતિ શ્રીરાધા વ્યજહાર
સ્ફુટં કાલી શૈબ્યા ચમરવનિતા મધ્યમવધૂ-
ર્મહાપદ્મા પદ્મા પરમરુચિકૃત્કામદકુચા ।
વરા ષષ્ઠી ચન્દ્રાવલિરપિ લસેદ્યસ્ય મહિષી
કથં તસ્યાપ્યન્યા ભવતુ ભુવિ યોગ્યા નવવધૂઃ ॥ ૨૮॥

તાચ્છ્રવણતો રોષેણૈવ સાટોપં તાસાં વાસનહારાદિકમાદાતુમુપસર્પતિ
શ્રીવ્રજેન્દ્રનન્દને સ્ફુટમેવ ચમ્પકલતા સોલ્લુણ્ઠમવદી-
વને ફુલ્લે ચિલ્લાતકપતિરયં બાઢમસકૃ-
ત્સતીરસ્માન્પ્રીત્યા પરિચરતિ ભોગાદિકુસુમૈઃ ।
ઇતિ શ્રીવૃત્તાન્તં નિષમયિતુમાર્યાં દિશ નૃપે
યથા શ‍ૃણ્વન્નસ્મૈ સ્રજમિહ સુખં પ્રેષયતિ સઃ ॥ ૨૯॥

ઇતિ ચમ્પકલતાલપિતમવધાર્ય સ્મિત્વા સશિરોધુનાનમુવાચ કૃષ્ણઃ
નૃપેન્દ્રેણૈવારાદપણવિપિનસ્યાવનકૃતે
નિયુજ્યાસ્માન્શશ્વદ્યદુત ગદિતં તા છ્રણુત ભોઃ ।
નિજો વા બાહ્યો વા હરતિ ય ઇહાસ્યાપિ ગલિતં
દલં વા પુષ્પં વા હરત કિલ તદ્વસ્ત્રપદકમ્ ॥ ૩૦॥

અતોઽહં યુષ્માકં મણિવસનહારાદિકમિદં

બલેનૈવાલુચ્ય પ્રમદભરતો યામિ સદનમ્ ।
ન મન્યધ્વે પુષ્પાઙ્કુરદલહૃતિં ચેન્નનુ તદા
વિચારં નીવીનામપિ કુચપટાનાં વિતરત ॥ ૩૧॥

ઇતિ સોલ્લુણ્ઠમાભાષ્ય સોદ્ગ્રીવમુદ્વીક્ષ્ય અયે ધ્રુવમેતા ગુણવત્યો નીવ્યઃ પરદ્રવ્યં ન રક્ષયિષ્યન્ત એવ કિન્તુ કઠિણેષ્વેતેષ્વેવ તલ્લક્ષણં લક્ષ્યતે । તથા હિ

ઉરોજાનુચ્છૂનાન્યદભિકલયામ્યદ્ય દિવસા-
ત્પરસ્માત્તસ્માન્મે કુસુમકુલમાત્રૈવ ભવિતા ।
અતો જિજ્ઞાસોર્મે સ્વકરમિલને દોષ ઇહ વો
ભવેચ્ચેન્મત્સ્પર્શાત્સ્વયમકપટં પ્રેક્ષયત તાન્॥ ૩૨॥

તદનન્તરં ભઙ્ગ્યા શ્રીરાધાનીવ્યામેવ સન્દેહમિવોદ્ભવ્ય તસ્યાં દૃષ્ટિં નિક્ષિપ્ય અહો ન્યાય્યમિત્યુચ્ચૈરાભાષ્ય રાધાં પ્રત્યુવાચ

રાધે ત્વન્નવનીવિકા ગુણમયી સાધ્વીતિ સાધ્વીગુણૈઃ
સશ્લાઘં પરિગીયતે યદિહ તત્સોલ્લુણ્ઠમેવ સ્ફુટમ્ ।
યદ્દૃષ્ટેઃ કૃપયા દ્રુતં નિવિદતો બન્ધાદ્વિમુક્તાપ્યસૌ
તામેવાદ્ય દૃઢં સદાત્મસવિધે નીત્વા બબન્ધ સ્વયમ્ ॥ ૩૩॥

ભોઃ પશ્યત પશ્યત કૃતાદ્યોઽનયા નીવ્યા દમ્ભવૃત્તિમાચાર્ય મત્સુરભિપુષ્પાણિ સ્વાધસ્તાદ્રક્ષિતાનિ સન્તિ યતો રોમાવલી નામ ભ્રમરપઙ્ક્તિસ્તત્સૌરભ્યમનુભૂય તદનુસરન્તિ વર્તતે। એતદાકર્ણનેન ભ્રૂભઙ્ગ્યા તમાક્ષિપ્ય ગૃહાય ગચ્છન્ત્યાં બલાત્કૃષ્ણેન વ્યાઘોતિતાયાં રાધાયાં તુઙ્ગવિદ્યાબ્રવી-

શઠેન્દ્ર ત્વં શશ્વત્પદકમપિ હર્તું વદસિ ય-
ત્તદસ્માભિઃ સોઢં નૃપસુતતયા સંપ્રતિ શ્રણુ ।
સમસ્તાઃ સમ્ભૂય હ્રિયમિહ વિહાય પ્રિયતમાં
ગ્રહિષ્યામોઽવશ્યં વયમપિ તવાચ્છિદ્ય મુરલીમ્ ॥ ૩૪॥

તતઃ શ્રીકૃષ્ણઃ સદર્પમુપદિશન્નિવાહ

અહં સખ્યે દક્ષસ્ચતુરયુવરાજો વ્રજપુરે
સ્વકં વૃન્દારણ્યં વિકસદભિરક્ષામ્યવિવશઃ
પ્રદાયારાદઙ્ગસ્રજમનુગતા મત્કરુણયા
સમસ્તા હિત્વૈતામપસરત ચૌરીં ચલસખીમ્ ॥ ૩૫॥

એવમાકર્ણ્ય લલિતાન્તઃ સુષ્ઠુ પ્રમુદિતા સાકુટભઙ્ગ્યાહ
પુનર્ગર્વં કુર્યાન્ન હિ વિટ શઠાસ્મત્પુર ઇહ
    વ્રજસ્યૈતસ્યાલં ચતુરયુવરાજોઽહમિતિ ભોઃ ।
યદેષા ત્વત્સેવ્યસ્મરનુતરસેન્દ્રપ્રિયસખી
    મહારઞ્જી ચણ્ડા ત્વદુપરિ ચ રાગાત્પ્રતપતિ ॥ ૩૬॥

કુટિલદૃષ્ટ્યા સહાસલજ્જયા તામવલોકયન્તીં શ્રીરાધાં પ્રતિ શ્રીકૃષ્ણો
વ્યજહાર
મુધાવાદં રાધે ન સૃજ નિજમત્તાલિલપના-
    દ્વ્રજે શુદ્ધા સાધ્વી યદસિ તદિદં વાચ્મિ વિનયૈઃ ।
ત્વમેતા હિત્વોગ્રા વનકરકૃતે મહ્યમચિરા-
    ત્પ્રસાદં દત્ત્વા તે રુચિરશુચિમાલાં વ્રજ ગૃહમ્ ॥ ૩૭॥

તા છ્રુત્વા સભ્રૂભઙ્ગં શ્રીરાધા ભઙ્ગ્યાહ
ત્વમાસાં વૈદગ્ધીઘટિતવપુષાં સંસદિ મદા-
    ન્ન ચેમં ભઙ્ગ્યાખ્યાં કુનટકુનતિં નાટય વૃથા ।
વનાદસ્માદ્ગત્વા સ્વકમુચિતભણ્ડત્વમચિરા-
    ન્નિજસ્થાનીમધ્યે રચય નિવસન્ભણ્ડસખિભિઃ ॥ ૩૮॥

તતઃ કૃષ્ણઃ સ્મિત્વા સસૌટીર્યમુવાચ
વ્રજેઽસ્મઞ્જુષ્ટાન્નાશનનિરતકીનાશવનિતાઃ
    કુરુધ્વે મે નષ્ટાં પ્રકટમટવીં કસ્ય બલતઃ ।
ઇદાનીં તાછાન્તિં બત ઝટિતિ લબ્ધું ગિરિપતે-
    ર્ગુહાકારાગારં ઘનતરતમિશ્રં પ્રવિશત ॥ ૩૯॥

તદાકર્ણ્ય સસ્મિતગર્વં વિશાખાબ્રવી-
ભવાદૃક્સમ્પૂજ્યોજ્જ્વલકુલવદેતત્પિતૃપદૈઃ
    સ્વયં દત્તા યસ્મૈ નવકમલિનીયં ગુણવતી ।
અહો સર્વશ્રેષ્ઠઃ સ ચ તવ વિતસ્યાપિ કૃષક-
    સ્તથોચ્છિષ્ટપ્રાશી પ્રથિતજટિલાસૂનુરભવત્ ॥ ૪૦॥

સદા પદ્માપુષ્ટાધરગલિતમાધ્વીકધયના-
    ન્નિકામં શ્યામાત્મા ભવસિ યદપિ દ્રાગપિ તથા ।
વિચાર્ય ત્વં સાધ્વીનુતગુણવિધું માતુલવધૂં
    ભજેમામત્ર સ્યાત્કિટવ શિવલાભસ્તવ યથા ॥ ૪૧॥

તા છુત્વા સનર્મભઙ્ગ્યોક્ત્યા દવીયઃસમ્બન્ધં ખ્યાપયન્કૃષ્ણઃ
સાદ્રમાલલાપ
અસાવસ્મન્માતુર્જનયતૃપ્રસૂપૌત્રવનિતેત્ય્-
    અલં જ્ઞાતં યસ્મિન્ક્ષણ ઇહ સદૈનં તદવધિ ।
નમામિ ધ્યાયામિ દ્રુતમનુસરામિ વ્રજપુરે
    ગ્રહીતું સત્કામાશિષમતિતરાં ભક્તિવિનતઃ ॥ ૪૨॥

ઉદઞ્ચન્મઞ્જીરધ્વનિસહચરીસઞ્ચયજુષ-
    શ્ચલન્ત્યા રાધાયાઃ પ્રકટિતરુષઃ શ્રીગિરિધરઃ ।
ગિરીન્દ્રાત્પારીન્દ્રાધિકગતિરુપેત્યાશુ નખરૈ-
    ર્ગજેન્દ્રોદ્યત્કુમ્ભદ્વયમિવ દદાર સ્તનયુગમ્ ॥ ૪૩॥

ઇદં રાધાકૃષ્ણોજ્જ્વલકુસુમકેલિકલિમધુ
    પ્રિયાલીનર્માલિપરિમલયુતં યસ્ય ભજનાત્ ।
મમાન્ધસ્યાપ્યેતદ્વચનમધુપેનાલ્પગતિના
    મનાગ્ઘ્રાતં તન્મે ગતિરતુલરૂપાઙ્ઘ્રિજરજઃ ॥ ૪૪॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીશ્રીરાધાકૃષ્ણોજ્જ્વલકુસુમકેલિઃ સમ્પૂર્ણા ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Prarthanamritastotram ॥ પ્રાર્થનામૃતસ્તોત્રમ્ ॥

શ્રીરૂપરતિમઞ્જર્યો-
રઙ્ઘ્રિસેવૈકગૃદ્ધ્નુના ।
અસઙ્ખ્યેનાપિ જનુષા
વ્રજે વાસોઽસ્તુ મેઽનિશમ્ ॥ ૧॥

અયં જીવો રઙ્ગૈર્નયનયુગલસ્યન્દિસલિલ
પ્રધૌતાઙ્ગો રઙ્ગો ઘટિતપટુરોમાલિનટનઃ ।
કદા રાસે લાસ્યૈઃ પ્રેમજલપરિક્લિન્નપુલક-
શ્રિયૌ રાધાકૃષ્ણૌ મદનસુનટૌ વિજયતિ ભોઃ ॥ ૨॥

પ્રેમોદ્રેકૈર્નયનનિપતદ્વારિધારો ધરણ્યાં
વૈવર્ણ્યાલીસવલિતવપુઃ પ્રૌઢકમ્પઃ કદાહમ્ ।
સ્વેદામ્ભોભિઃ સ્નપિતપુલકશ્રેણિમૂલઃ સ્મિતોક્તૌ
રાધાકૃષ્ણૌ મદનસમરસ્ફારદક્ષૌ સ્મરામિ ॥ ૩॥

મસારક્ષ્માસારોદ્ભવનવતમાલોદ્ભટમદ-
પ્રહારિશ્રીભારોજ્જ્વલવપુષમુદ્યાછુચિરસૈઃ ।
કદા રાકાચન્દ્રસ્તુતવદનનિદ્રાલસદૃશં
દૃશા કૃષ્ણં વક્ષઃસ્વપનપરરાધં સખિ ભજે ॥ ૪॥

સરાગં કુર્વત્યઃ સખિ હરિકૃતે હારરચનં
કરે શ્રીરાધાયાઃ પ્રકટપુલકોદ્રેકિ મયકા ।
વિચિત્યાલં ચઞ્ચદ્દ્યુતિવિવિધવર્ણં મણિકુલં
ક્રમેણારાદ્દેયં કિમિતિ કૃપયા તાચરણયોઃ ॥ ૫॥

માનેનાલં કવલિતધિયા શ્યામયા રાધિકાર્દ્રા
દ્રાગાહૂતા વ્યસનકથનાયેતિ સંવિદ્ય કીરાત્ ।

તસ્યા વેશૈર્ગતમઘહરં તસ્ય દોષં લપન્તં
    તુષ્ટ્યાલિઙ્ગ્ય ત્વરિતમથ સા જ્ઞાતતત્ત્વા જડાસીત્ ॥ ૬॥

સનીરમુદિરદ્યુતિઃ પુરટનિન્દિવસ્ત્રં દધા-
    છિખણ્ડકૃતશેખરઃ સ્ફુરિતવાન્યવેશઃ સુખી ।
સમૃદ્ધવિધુમણ્ડલીસ્તવનલઙ્ઘિવક્ત્રે ધૃતં
    ક એષ સખિ વાદયન્મુરલિમદ્ય બુદ્ધિં હરેત્ ॥ ૭॥

એકં સ્વપ્નવરં શ‌ૃણુષ્વ લલિતે હા હા સખિ શ્રાવય
    સ્વપ્ને પુષ્પહૃતૌ ત્વયા સહ મયા પ્રાપ્તે વને મત્પુરઃ ।
તન્વત્યા દરવીક્ષ્ય ચઞ્ચલદૃશાનઙ્ગં સદઙ્ગં બલા-
    ત્સ્મેરઃ કશ્ચન મેઘસુન્દરવપુસ્ત્વામાલિલિઙ્ગોન્મદઃ ॥ ૮॥

દૃષ્ટ્વા ગોપતિનન્દનસ્ય કદનં વેણુર્ગતો મૂકતાં
    સર્વે સ્થાવરજઙ્ગમા વ્રજવનીજાતા યયુઃ ક્ષીણતામ્ ।
સોઽપિ વ્યાઘ્રસુહૃદ્ધૃતો ભુવિ લુઠન્નાસ્તે વિભૂષઃ કૃશો
    રાધે ત્વં તુ મુદા સદાધિપયસા માનોરગં પોષય ॥ ૯॥

ક્વ રાધે ત્વં સાક્ષાદિત ઇતવતી ત્વદ્વશમિમં
    જનં હા હાગત્ય સ્નપય કૃપયા કૌતુકરસૈઃ ।
 ઇતિ વ્યાગ્રં શશ્વન્મુરલિવિવરે ઘર્ઘરરવં
    વિતન્વાને કૃષ્ણે સ્મિતવલિતવામેયમુદભૂત્ ॥ ૧૦॥

કૃત્વા વામકરેઽદ્ય કર્મુકમયે પૌષ્પં કરસ્યાપર-
    સ્યાભુગ્નાઙ્ગુલિયુગ્મકેન સરલં ન્યાસ્યેષુમસ્મિન્પુરઃ ।
કઃ શ્યામો નટવેશ એષ સુહૃદાં સઙ્ગેન રઙ્ગં સૃજ-
    ન્સ્મેરઃ સુન્દરિ બમ્ભ્રમીતિ મદનસ્યોન્માદિદૃગ્વિભ્રમઃ ॥ ૧૧॥

શ્યામાશ્યામનિકામકામસમરોજ્જૃમ્ભચ્ચ્યુતાલઙ્કૃતિ-
    સ્તોમામોદિતમાલ્યકુઙ્કુમહિમવ્યાકીર્ણકુઞ્જં મુદા ।
દૃષ્ટ્વાગત્ય સખિ શ્રમેણ પવનં દૂરે ભજત્તદ્યુગં
    દ્રષ્ટું ન્યસ્તદૃશૌ કદાપિ મયિ તત્સ્મેરં દૃશં ધાસ્યતિ ॥ ૧૨॥

સુબલસખાધરપલ્લવ-
    સમુદિતમધુમાધુરીલુબ્ધામ્ ।
રુચિજિતકાઞ્ચનચિત્રાં
    કઞ્ચનચિત્રાં પિકીં વન્દે ॥ ૧૩॥

વૃષરવિજાધરબિમ્બી-
    ફલરસપાનોત્કમદ્ભુતં ભ્રમરમ્ ।
કૃતશિખિપિઞ્છકચૂલં
    પીતદુકૂલં ચિરં નૌમિ ॥ ૧૪॥

જિતઃ સુધાંશુર્યશસા મમેતિ
    ગર્વં મૂઢ મા બત ગોષ્ઠવીર ।
તવારિનરીનયનામ્બુપાલી
    જિગાય તાતં પ્રસભં યતોઽસ્ય ॥ ૧૫॥

અદૃષ્ટા દૃષ્ટેવ સ્ફુરતિ સખિ કેયં વ્રજવધૂઃ
    કુતોઽસ્મિન્નાયાતા ભજિતુમતુલા ત્વાં મધુપુરાત્ ।
અપૂર્વેણાપુર્વાં રમય હરિણૈનામિતિ સરા-
    ધિકોદ્યદ્ભઙ્ગ્યુક્ત્યા વિદિતયુવતિત્વઃ સ્મિતમધાત્ ॥ ૧૬॥

ત્વદ્ભાગ્યાદિન્દુકાન્તિર્વનમણિસદનં મણ્ડયન્તી સમન્તા-
    દ્ભ્રાજત્યસ્મિન્વસન્તી હતમપિ તિમિરં મધ્યરાત્રં ચ વીતમ્ ।
તૂર્ણં તસ્માચ્ચકોર વ્રજ નિજગગનાત્સેવિતું તં પિપાસો
    યાવત્સૂરોઽભિમન્યુર્દ્રુતમિહ ઉદિતસ્ત્વાં ન દૂરીકરોતિ ॥ ૧૭॥

ચકોરીવ જ્યોત્સ્નાયુતમમૃતરશ્મિં સ્થિરતડિ-
    દ્વૃતં દિવ્યામ્ભોદં નવમિવ રતાચાતકવધૂઃ ।
તમાલં ભૃઙ્ગીવોદ્યતરુચિ કદા સ્વર્ણલતિકા-
    શ્રિતં રાધાશ્લિષ્ટં હરિમિહ દૃગેષા ભજતિ મે ॥ ૧૮॥

દૂતીભિશ્ચટુવારિભિઃ સખિગણૈર્ભેદાર્દ્રશાખાહતિ-
    વ્રાતૈઃ પાદલુઠાચ્છિરઃશ્રિતરજોવૃષ્ટ્યા બકીવિદ્વિષા ।
રાધાયાઃ સખિ શક્યતે શમયિતું યો માનવહ્નિર્ન યાતં
    નિર્વાપયતીહ ફુત્કૃતીકણૈસ્તાં સિદ્ધવંશીં નુમઃ ॥ ૧૯॥

પ્રાણક્ષ્વેલિભુવં વ્રજં વ્રજજનં તાતં પ્રસૂં ગાઃ સખી-
    ન્ગોપીઃ કામપિ તાં વિના વિષમભૂદ્દ્વારાવતી મિત્ર મે ।
ઇત્થં સ્વપ્રિકશીર્ણમાધવવચઃ શ્રુત્વૈવ ભામાપિ સા
    તદ્યુક્તા કિલ લોકિતું તદખિલં તં ચાટુના યાચતે ॥ ૨૦॥

તમાલસ્ય ક્રોડે સ્થિતકનકયૂથીં પ્રવિલસ-

ત્પ્રસૂનાં લોલાલિં સખિ કલય વન્દ્યં ચિરમિમમ્ ।
તિરસ્કર્તુર્મેઘદ્યુતિમઘભિદોઽઙ્કે સ્થિતચલ-
દૃશં સ્મેરાં રાધાં તડિદતિરુચિં સ્મારયતિ યા ॥ ૨૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
પ્રાર્થનામૃતસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Navashtakam ॥ નવાષ્ટકમ્ ॥

ગૌરીં ગોષ્ઠવનેશ્વરીં ગિરિધરપ્રાનાધિકપ્રેયસીં
    સ્વીયપ્રાણપરાર્ધપુષ્પપટલીનિર્મઞ્છ્યતત્પદ્ધતિમ્ ।
પ્રેમ્ણા પ્રાનવયસ્યયા લલિતયા સંલાલિતાં નર્મભિઃ
    સિક્તાં સુષ્ઠુ વિશાખયા ભજ મનો રાધામગાધાં રસૈઃ ॥ ૧॥

સ્વીયપ્રેષ્ઠસરોવરાન્તિકવલત્કુઞ્જાન્તરે સૌરભો-
    ત્ફુલ્લત્પુષ્પમરન્દલુબ્ધમધુપશ્રેણીધ્વનિભ્રાજિતે ।
માદ્યન્મન્મથરાજ્યકાર્યમસકૃદ્સમ્ભાલયન્તીં સ્મરા-
    માત્યશ્રીહરિણા સમં ભજ મનો રાધામગાધાં રસૈઃ ॥ ૨॥

કૃષ્ણાપઙ્ગતરઙ્ગતુઙ્ગિતતરાનઙ્ગાસુરઙ્ગાં ગિરં
    ભઙ્ગ્યા લઙ્ગિમસઙ્ગરે વિદધતીં ભઙ્ગં નુ તદ્રઙ્ગિણઃ ।
ફુલ્લત્સ્મેરસખીનિકાયનિહિતસ્વાશીઃસુધાસ્વાદન
    લબ્ધોન્માદધુરોદ્ધુરાં ભજ મનો રાધામગાધાં રસૈઃ ॥ ૩॥

જિત્વા પાશકકેલિસઙ્ગરતરે નિર્વાદબિમ્બાધરં
    સ્મિત્વા દ્વિઃ પણિતં ધયત્યઘહરે સાનન્દગર્વોદ્ધુરે ।
ઈષાછોણદૃગન્તકોણમુદયદ્રોમઞ્ચકમ્પસ્મિતં
    નિઘ્નન્તીં કમલેન તં ભજ મનો રાધામગાધાં રસૈઃ ॥ ૪॥

અંસે ન્યસ્ય કરં પરં બકરિપોર્બાઢં સુસખ્યોન્મદાં
    પશ્યન્તીં નવકાનનશ્રિયમિમામુદ્યદ્વસન્તોદ્ભવામ્ ।
પ્રીત્યા તત્ર વિશાખયા કિશલયં નવ્યં વિકીર્ણં પ્રિય-
    શ્રોત્રે દ્રાગ્દધતીં મુદા ભજ મનો રાધામગાધાં રસૈઃ ॥ ૫॥

મિથ્યાસ્વાપમનલ્પપુષ્પશયને ગોવર્ધનાદ્રેર્ગુહા-
    મધ્યે પ્રાગ્દધતો હરેર્મુરલિકાં હૃત્વા હરન્તીં સ્રજમ્ ।

સ્મિત્વા તેન ગૃહીતકણ્ઠનિકટાં ભીત્યાપસારોત્સુકાં
    હસ્તાભ્યાં દમિતસ્તનીં ભજ મનો રાધામગાધાં રસૈઃ ॥ ૬॥

તૂર્ણં ગાઃ પુરતો વિધાય સખિભિઃ પૂર્ણં વિશન્તં વ્રજે
    ઘૂર્ણદ્ધૌવતકાઙ્ક્ષિતાક્ષિનટનૈઃ પશ્યન્તમસ્યા મુખમ્ ।
શ્યામં શ્યામદૃગન્તવિભ્રમભરૈરાન્દોલયન્તીતરાં
    પદ્મામ્લાનિકરોદયાં ભજ મનો રાધામગાધાં રસૈઃ ॥ ૭॥

પ્રોદ્યત્કાન્તિભરેણ બલ્લવવધૂતારાઃ પરાર્ધાત્પરાઃ
    કુર્વાણાં મલિનઃ સદોજ્જ્વલરસે રાસે લસન્તીરપિ ।
ગોષ્ઠારણ્યવરેણ્યધન્યગગને ગત્યાનુરાધાશ્રિતાં
    ગોવિન્દેન્દુવિરાજિતાં ભજ મનો રાધામગાધાં રસૈઃ ॥ ૮॥

પ્રીત્યા સુષ્ઠુ નવાષ્ટકં પટુમતિર્ભૂમૌ નિપત્ય સ્ફુટં
    કાક્વા ગદ્ગદનિસ્વનેન નિયતં પૂર્ણં પઠેદ્યઃ કૃતી ।
ઘૂર્ણન્મત્તમુકુન્દભૃઙ્ગવિલસદ્રાધાસુધાવલ્લરીં
    સેવોદ્રેકરસેણ ગોષ્ઠવિપિને પ્રેમ્ણા સ તાં સિઞ્ચતિ ॥ ૯॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        નવાષ્ટકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Gopalarajastotra ॥ શ્રીગોપાલરાજસ્તોત્રમ્ ॥

વપુરતુલતમાલસ્ફીતબાહૂરુશાખો
  પરિધૃતગિરિવર્યસ્વર્ણવર્ણૈકગુચ્છઃ ।
કટિકૃતપરહસ્તારક્તશાખાગ્રહૃદ્ધઃ
  પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧॥

રુચિરદૃગભિધાને પઙ્કજે ફુલ્લયન્તં
  સુભગવદનગાત્રં ચિત્રચન્દ્રં દધાનઃ ।
વિલસદધરબિમ્બઘ્રાયિનાસાશુકોષ્ઠઃ
  પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૨॥

ચલકુટિલતરભ્રૂકર્મુકાન્તર્દૃગન્ત
  ક્રમણનિશિતબાણં શીઘ્રયાનં દધાનઃ ।
દવયિતુમિવ રાધાધૈર્યપારીન્દ્રવર્યં
  પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૩॥

અસુલભમિહ રાધાવક્ત્રચુમ્બં વિજાનન્-
  નિવ વિલસિતુમેતા છાયયાપિ પ્રદૂરાત્ ।
મુકુરયુગલમચ્છં ગણ્ડદમ્ભેન બિભ્ર-
  ત્પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૪॥

રુચિનિકરવિરાજદ્દાડિમીપક્વબીજ
  પ્રકરવિજયિદન્તશ્રેણિસૌરભ્યવાતૈઃ ।
રચિતયુવતિચેતઃકીરજિહ્વાતિલૌલ્યઃ
  પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૫॥

વચનમધુરસાનાં પાયનૈર્ગોપરામા
  કુલમુરુધૃતધામાપ્યુન્મદીકૃત્ય કામમ્ ।

અભિમતરતિરત્નાન્યાદદાનસ્તતો દ્રાક્
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૬॥

કુવલયનિભભાલે કૌઙ્કુમદ્રાવપુણ્ડ્રં
દધદિવ ઘનશણ્ડે નિશ્ચલાચઞ્ચલાગ્રમ્ ।
રચયિતુમિવ સાધ્વીકીર્તિમુગ્ધાલિભીતિં
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૭॥

શ્રવણમદનરજ્જૂ સજ્જયલ્લજ્જિરાધા
નયનચલચકોરૌ બન્ધુમુત્કઃ કિશોરૌ ।
કૃતમકરવતંસસ્નિગ્ધચન્દ્રાંશુચારઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૮॥

યુવતિકરણરત્નવ્રાતમાચ્છિદ્ય નેત્ર
ભ્રમણપટુભટૈસ્તં ન્યસ્ય હૃત્સૌધમધ્યે ।
ગરુડમણિકવાટેનોરસાધુષ્ય હૃષ્ટઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૯॥

ત્રિબલિલલિતતુણ્ડસ્યન્દિનાભિહ્રદોદ્ય-
ત્તનુરુહતતિસર્પીમત્ર બિભ્રાણ ઉગ્રામ્ ।
યુવતિપતિભયાખુગ્રાસનાયેવ સદ્યઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૦॥

મરકતકૃતરમ્ભાગર્વસર્વાઙ્કુશોરુ
દ્વયમુરુરસધામ પ્રેયસીનાં દધાનઃ ।
સ્ફુરદવિરલપુષ્ટશ્રોણિભારાતિરમ્યઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૧॥

મદનમણિવરાલીસમ્પુટક્ષુલ્લજાનુ
દ્વયસુલલિતજઙ્ઘામઞ્જુપાદાબ્જયુગ્મઃ ।
વિવિધવસનભૂષાભૂષિતાઙ્ગઃ સુકણ્ઠઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૨॥

કલિતવપુરિવ શ્રીવિટ્ઠલપ્રેમપુઞ્જઃ
પરિજનપરિચર્યાવર્યપીયૂષપુષ્ટઃ ।
દ્યુતિભરજિતમદ્યન્મન્મથોદ્યત્સમાજઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૩॥

વિવિધભજનપુષ્પૈરિષ્ટનામાનિ ગૃહ્ણ-
ન્પુલકિતતનુરિહ શ્રીવિટ્ઠલસ્યોરુસખ્યૈઃ ।
પ્રણયમણિસરં સ્વં હન્ત તસ્મૈ દદાનઃ
પ્રતપતિ ગિરિપટ્ટે સુષ્ઠુ ગોપાલરાજઃ ॥ ૧૪॥

ગિરિકુલપતિપટ્ટોલ્લાસિગોપાલરાજ
સ્તુતિવિલસિતપદ્યાન્યુદ્ભટપ્રેમદાનિ ।
નટયતિ રસનાગ્રે શ્રદ્ધયા નિર્ભરં યઃ
સ સપદિ લભતે તત્પ્રેમરત્નં પ્રસાદમ્ ॥ ૧૫॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીગોપાલરાજસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Madanagopalastotram ॥ શ્રીમદનગોપાલસ્તોત્રમ્ ॥

વનભુવિ રવિકન્યાસ્વચ્છકચ્છાલિપાલિ
    ધ્વનિયુતવરતીર્થદ્વાદશાદિત્યકુઞ્જે ।
સકનકમણિવેદીમધ્યમધ્યાધિરૂઢઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧॥

સુભગનવશિખણ્ડભ્રાજદુષ્ણીષહારા-
    ઙ્ગદવલયસમુદ્રાધ્વાનમઞ્જીરરમ્યઃ ।
વસનઘુસૃણચર્ચામલ્લિકોલ્લાસિતાઙ્ગઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૨॥

કટિકૃતવરભઙ્ગન્યસ્તજઙ્ઘાન્યજઙ્ઘઃ
    કરયુગધૃતવંશીં ન્યસ્તબિમ્બાધરાગ્રે ।
સુમધુરમતિતિર્યગ્ગ્રીવયા વાદયંસ્તાં
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૩॥

વિધિકૃતવિધુસૃષ્ટિવ્યર્થતાકારિવક્ત્ર
    દ્યુતિલવહૃતરાધાસ્થૂલમાનાન્ધકારઃ ।
સ્મિતલપિતમધૂલ્યોન્માદિતૈતદ્ધૃષીકઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૪॥

શરદુદિતસરોજવ્રાતવિત્રાસિનેત્રઽ-
    ન્ચલકુટિલકટાક્ષૈર્મન્દરોડ્ડુણ્ડચાલૈઃ ।
ઝટિતિ મથિતરાધાસ્વાન્તદુગ્ધાર્ણવાન્તઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૫॥

કુટિલચટુલચિલ્લીવલ્લિલાસ્યેન લબ્ધ
    પ્રથિતસકલસાધ્વીધર્મરત્નપ્રસાદઃ ।

તિલકવદલિકેન ધ્વસ્તકામેષુચાપઃ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૬॥

શુકયુવવરચઞ્ચુપ્રાંશુનાસાંશુસિન્ધૌ
　　જનિતકુલવધૂટીદૃષ્ટિમત્સ્યીવિહારઃ ।
સ્મિતલવયુતરાધાજલ્પમન્ત્રોન્મદાન્તઃ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૭॥

વિકસદધરબન્ધૂકાન્તરુડ્ડીય ગન્ધૈઃ
　　પતિતમુપ વિધર્તું રાધિકાચિત્તભૃઙ્ગમ્ ।
દશનરુચિગુણાગ્રે દત્તતત્સીધુચારઃ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૮॥

શ્રવણમદનકન્દપ્રેક્ષણોડ્ડીનરાધા
　　ધૃતિવિભવવિહઙ્ગે ન્યસ્તનેત્રાન્તબાણઃ ।
અલકમધુપદત્તદ્યોતમાધ્વીકસત્રઃ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૯॥

પરિમલરુચિપાલીશાલિગાન્ધર્વિકોદ્ય-
　　ન્મુખકમલમધૂલીપાનમત્તદ્વિરેફઃ ।
મુકુરજયિકપોલે મૃગ્યતાચુમ્બબિમ્બઃ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૧૦॥

મકરમુખસદૃક્ષસ્વર્ણવર્ણાવતંસ
　　પ્રચલનહૃતરાધાસર્વશારીરધર્મઃ ।
તદતિચલદૃગન્તસ્વસ્થવંશે ધૃતાક્ષઃ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૧૧॥

હરિમણિકૃતશઙ્ખશ્લાઘિતોલ્લઙ્ઘિલેખા
　　ત્રયરુચિવૃતકણ્ઠસ્યોપકણ્ઠે મણીન્દ્રમ્ ।
દધદિહ પરિરબ્ધું રાધિકાં બિમ્બિતાં ચ
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૧૨॥

કુવલયકૃતવક્ષસ્તલ્પમુચ્ચં દધાનઃ
　　શ્રમવિલુલિતરાધાસ્વાપનાયૈવ નવ્યમ્ ।
ભુજયુગમપિ દિવ્યં તત્પ્રકાણ્ડોપધાનં
　　સ્ફુરતિ મદનપૂર્વઃ કોऽપિ ગોપાલ એષઃ ॥ ૧૩॥

રુચિરજઠરપત્રે ચિત્રનાભીતટોદ્ય-
    ત્તનુરુહતતિનામ્નીં બલ્લવીવૃન્દભુક્ત્યૈ ।
સ્મરનૃપતિસમુદ્રસ્વાક્ષરાલીં દધાનઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૪॥

યુવતિહૃદલસેભપ્રૌઢબન્ધાય કામ
    સ્થપિતચિતરસોરુસ્તમ્ભજૃમ્ભાભિરામઃ ।
મરકતકટજૈત્રકુલ્લજાનુપ્રસન્નઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૫॥

પ્રણયનવમધૂનાં પાનમાત્રૈકગત્યા
    સકલકરણજીવ્યં રાધિકામત્તભૃઙ્ગ્યાઃ ।
અરુણચરણકઞ્જદ્વન્દ્વમુલ્લાસ્ય પશ્ય-
    ન્સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૬॥

અતુલવિલસદઙ્ગશ્રેણિવિન્યાસભઙ્ગ્યા
    ગ્લપિતમદનકોટિસ્ફારસૌન્દર્યકીર્તિઃ ।
બલલવહતમત્તાપારપારીન્દ્રદર્પઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૭॥

તરણિદુહિતૃકચ્છે સ્વચ્છપાથોદધામા
    સમુદિતનવકામાભિરરામાવલીણામ્ ।
તડિદતિરુચિબાહુસ્ફુર્જદંસોઽતિજૃમ્ભ-
    ન્સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૮॥

નવતરુણિમભટ્ટાચાર્યવર્યેણ શાસ્ત્રં
    મનસિજમુનિ ક્લ્પ્તં ન્યાયમધ્યાપિતાભિઃ ।
નવનવયુવતીભિર્બિભ્રદુદ્ગ્રાહમસ્મિ-
    ન્સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૧૯॥

રતિમતિરચયન્ત્યા રાધિકાનર્મકાન્ત્યા
    સ્થગિતવચનદર્પઃ સ્ફારિતાન્યપ્રસઙ્ગઃ ।
ખરમતિલલિતાસ્યે કિઞ્ચિદઞ્ચત્સ્મિતાક્ષઃ
    સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૨૦॥

સવિધરમિતરાધઃ સાગ્રજસ્નિગ્ધરૂપ

પ્રણયરુચિરચન્દ્રઃ કુઞ્જખેલાવિતન્દ્રઃ ।
રચિતજનચકોરપ્રેમપીયૂષવર્ષઃ
સ્ફુરતિ મદનપૂર્વઃ કોઽપિ ગોપાલ એષઃ ॥ ૨૧॥

મદનવલિતગોપાલસ્ય યઃ સ્તોત્રમેત-
ત્પઠતિ સુમતિરુદ્યદ્દૈન્યવન્યાભિષિક્તઃ ।
સ ખલુ વિષયરાગં સૌરિભાગં વિહાય
પ્રતિજનિ લભતે તત્પાદકઞ્જાનુરાગમ્ ॥ ૨૨॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીમદનગોપાલસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Vishakhanandabhidhastotram ॥ શ્રીવિશાખાનન્દાભિધસ્તોત્રમ્ ॥

ભાવનામગુણાદીનામૈક્યાત્શ્રીરાધિકૈવ યા ।
કૃષ્ણેન્દોઃ પ્રેયસી સા મે શ્રીવિશાખા પ્રસીદતુ ॥ ૧॥

જયતિ શ્રીમતી કાચિદ્વૃન્દારણ્યવિહારિણી ।
વિધાતુસ્તરુણીસૃષ્ટિકૌશલશ્રીઋ ઇહોજ્જ્વલા ॥ ૨॥

છિન્નસ્વર્ણસદૃક્ષાઙ્ગી રક્તવસ્ત્રાવગુણ્ઠિની ।
નિર્બન્ધબદ્ધવેણીકા ચારુકાશ્મીરચર્ચિતા ॥ ૩॥

દ્વિકાલેન્દુલલાટોદ્યત્કસ્તૂરીતિલકોજ્જ્વલા ।
સ્ફુટકોકનદદ્વન્દ્વ બન્ધુરીકૃતકર્ણિકા ॥ ૪॥

વિચિત્રવર્ણવિન્યાસ ચિત્રિતીકૃતવિગ્રહા
કૃષ્ણચોરભયાચ્ચોલી ગુમ્ફીકૃતમણિસ્તની ॥ ૫॥

હારમઞ્જીરકેયૂર ચૂડાનાસાગ્રમૌક્તિકૈઃ ।
મુદ્રિકાદિભિરન્યૈશ્ચ ભૂષિતા ભૂષણોત્તમૈઃ ॥ ૬॥

સુદીપ્તકજ્જલોદ્દીપ્ત નયનેન્દીવરદ્વય ।
સૌરભોજ્જ્વલતામ્બૂલ મઞ્જુલા શ્રીમુખામ્બુજા ॥ ૭॥

સ્મિતલેશલસત્પક્વ ચારુબિમ્બફલાધરા ।
મધુરાલાપપીયૂષ સઞ્જીવિતસખીકુલા ॥ ૮॥

વૃષભાનુકુલોત્કીર્તિ વર્ધિકા ભાનુસેવિકા ।
કીર્તિદાખણિરત્નશ્રીઃ શ્રીજિતશ્રીઃ શ્રિયોજ્જ્વલા ॥ ૯॥

અનઙ્ગમઞ્જરીજ્યેષ્ઠા શ્રીદામાનન્દદાનુજા ।
મુખરાદૃષ્ટિપીયૂષ વર્તિનપ્ત્રી તદાશ્રિતા ॥ ૧૦॥

પૌર્ણમાસીબહિઃખેલત્પ્રાણપઞ્જરસારિકા ।

સુબલપ્રણયોલ્લાસા  તત્ર વિન્યસ્તભારકા ॥ ૧૧॥

વ્રજેશ્યાઃ કૃષ્ણવત્પ્રેમ પાત્રી તત્રાતિ ભક્તિકા ।
અમ્બાવાત્સલ્યસંસિક્તા  રોહિણીઘ્રાતમસ્તકા ॥ ૧૨॥

વ્રજેન્દ્રચરણામ્ભોજે ઽર્પિતભક્તિપરમ્પરા ।
તસ્યાપિ પ્રેમપાત્રીયં  પિતુર્ભાનોરિવ સ્ફુટમ્ ॥ ૧૩॥

ગુરુબુદ્ધ્યા પ્રલમ્બારૌ  નતિં દૂરે વિતન્વતી ।
વધૂબુદ્ધ્યૈવ તસ્યાપિ  પ્રેમભૂમીહ હ્રીયુતા ॥ ૧૪॥

લલિતાલલિતા સ્વીય પ્રાણોરુલલિતાવૃતા ।
લલિતાપ્રાણરક્ષૈકરક્ષિતા તદ્વશાત્મિકા ॥ ૧૫॥

વૃન્દાપ્રસાધિતોત્તુઙ્ગ કુડુઙ્ગાનઙ્ગવેશ્મનિ ।
કૃષ્ણખણ્ડિતમાનત્વાલ્ લલિતાભીતિકમ્પિની ॥ ૧૬॥

વિશાખનર્મસખ્યેન  સુખિતા તદ્ગતાત્મિકા ।
વિશાખાપ્રાણદીપાલિ નિર્મઞ્છ્યનખચન્દ્રિકા ॥ ૧૭॥

સખીવર્ગૈકજીવાતુસ્મિતકૈરવકોરકા ।
સ્નેહફુલ્લીકૃતસ્વીયગણા ગોવિન્દવલ્લભા ॥ ૧૮॥

વૃન્દારણ્યમહારાજ્યમહાસેકમહોજ્જ્વલા ।
ગોષ્ઠસર્વજનાજીવ્યવદના રદનોત્તમા ॥ ૧૯॥

જ્ઞાતવૃન્દાટવીસર્વલતાતરુમૃગદ્વિજા ।
તદીયસખ્યસૌરભ્યસુરભીકૃતમાનસા ॥ ૨૦॥

સર્વત્ર કુર્વતિ સ્નેહં સ્નિગ્ધપ્રકૃતિરાભવમ્ ।
નામમાત્રજગાચિત્તદ્રાવિકા દીનપાલિકા ॥ ૨૧॥

ગોકુલે કૃષ્ણચન્દ્રસ્ય સર્વાપચ્છાન્તિપૂર્વકમ્ ।
ધીરલાલિત્યવૃદ્ધ્યર્થં ક્રિયમાણવ્રતાધિકા ॥ ૨૨॥

ગુરુગોવિપ્રસત્કારરતા વિનયસન્નતા ।
તદાશીઃશતવર્ધિષ્ણુસૌભાગ્યાદિગુણાઞ્ચિતા ॥ ૨૩॥

આયુર્ગોશ્રીયશોદાયિપાકો દુર્વાસસો વરાત્ ।
અતઃ કુન્દલતાનીયમાના રાજ્ઞ્યાઃ સમાજ્ઞયા ॥ ૨૪॥

ગોષ્ઠજીવાતુગોવિન્દજીવાતુલપિતામૃતા ।
નિજપ્રાનાર્બુદશ્રેણિરક્ષ્યતત્પાદરેણુકા ॥ ૨૫॥

કૃષ્ણપદારવિન્દોદ્યન્મકરન્દમયે મુદા ।
અરિષ્ટમર્દિ કાસારે સ્નાત્રી નિર્બન્ધતોઽન્વહમ્ ॥ ૨૬॥

નિજકુન્દપુરસ્તીરે રત્નસ્થલ્યામહર્નિશમ્ ।
પ્રેષ્ઠનર્માલિભિર્ભઙ્ગ્યા સમં નર્મ વિતન્વતી ॥ ૨૭॥

ગોવર્ધનગુહાલક્ષ્મીર્ગોવર્ધનવિહારિણી ।
ધૃતગોવર્ધનપ્રેમા ધૃતગોવર્ધનપ્રિયા ॥ ૨૮॥

ગાન્ધર્વાદ્ભુતગાન્ધર્વા રાધા બાધાપહારિણી ।
ચન્દ્રકાન્તિશ્ચલાપઙ્ગી રાધિકા ભાનુરાધિકા ॥ ૨૯॥

ગાન્ધર્વિકા સ્વગન્ધાતિસુગન્ધીકૃતગોકુલા ।
ઇતિ પઞ્ચભિરાહૂતા નામભિર્ગોકુલે જનૈઃ ॥ ૩૦॥

હરિણી હરિણીનેત્રા રઙ્ગિણી રઙ્ગિણીપ્રિયા ।
રઙ્ગિણીધ્વનિનાગચ્છત્સુરઙ્ગધ્વનિહાસિની ॥ ૩૧॥

બદ્ધનન્દીશ્વરોત્કણ્ઠા કાન્તકૃષ્ણૈકકક્ષ્યા ।
નવાનુરાગસમ્બન્ધમદિરોન્મત્તમાનસા ॥ ૩૨॥

મદનોન્માદિગોવિન્દમકસ્માત્પ્રેક્ષ્ય હાસિની ।
લપન્તી રુદતી કમ્પ્રા રુષ્ટા દષ્ટાધરાતુરા ॥ ૩૩॥

વિલોકયતિ ગોવિન્દે સ્મિત્વા ચારુમુખામ્બુજમ્ ।
પુષ્પાકૃષ્ટિમિષાદૂર્ધ્વે ધૃતદોર્મુલચાલના ॥ ૩૪॥

સમક્ષમપિ ગોવિન્દમવિલોક્યેવ ભાવતઃ ।
દલે વિલિખ્ય તન્મૂર્તિં પશ્યન્તી તદ્વિલોકિતામ્ ॥ ૩૫॥

લીલયા યાચકં કૃષ્ણમવધીર્યેવ ભામિની ।
ગિરીન્દ્રગાહ્વરં ભઙ્ગ્યા પશ્યન્તી વિકસદૃશા ॥ ૩૬॥

સુબલસ્કન્ધવિન્યસ્તબાહૌ પશ્યતિ માધવે ।
સ્મેરા સ્મેરારવિન્દેન તમાલં તડયન્ત્યથ ॥ ૩૭॥

લીલયા કેલિપાથોજં સ્મિત્વા ચુમ્બિતમાધવે ।
સ્મિત્વા ભાલાત્તકસ્તૂરીરસં ધૃતવતી ક્વચિત્ ॥ ૩૮॥

મહાભાવોજ્જ્વલાચિન્તારત્નોદ્ભવિતવિગ્રહામ્ ।
સખીપ્રણયસદ્ગન્ધવરોદ્વર્તનસુપ્રભામ્ ॥ ૩૯॥

કારુણ્યામૃતવીચિભિસ્તારુણ્યામૃતધારયા ।
લાવણ્યામૃતવન્યાભિઃ સ્નપિતાં ગ્લપિતેન્દિરામ્ ॥ ૪૦॥

હ્રીપટ્ટવસ્ત્રગુપ્તાઙ્ગીં સૌન્દર્યઘુસૃણાઞ્ચિતામ્ ।
શ્યામલોજ્જ્વલકસ્તૂરીવિચિત્રિતકલેવરામ્ ॥ ૪૧॥

કમ્પાશ્રુપુલકસ્તમ્ભસ્વેદગદ્ગદરક્તતા ।
ઉન્મદો જાડ્યમિત્યેતૈ રત્નૈર્નવભિરુત્તમૈઃ ॥ ૪૨॥

ક્લૃપ્તાલઙ્કૃતિસંશ્લિષ્ટાં ગુણાલિપુષ્પમાલિનીમ્ ।
ધીરાધિરત્વસદ્વષપટવાસૈઃ પરિષ્કૃતામ્ ॥ ૪૩॥

પ્રચ્છન્નમાનધમ્મિલ્લાં સૌભાગ્યતિલકોજ્જ્વલામ્ ।
કૃષ્ણનામયશઃશ્રાવાવતંસોલ્લાસિકર્ણિકામ્ ॥ ૪૪॥

રાગતમ્બૂલરક્તોષ્ઠીં પ્રેમકૌટિલ્યકજ્જલામ્ ।
નર્મભાષિતનિઃસ્યન્દસ્મિતકર્પૂરવાસિતામ્ ॥ ૪૫॥

સૌરભાન્તઃપુરે ગર્વપર્યઙ્કોપરિ લીલયા ।
નિવિષ્ટાં પ્રેમવૈચિત્ત્યવિચલત્તરલાઞ્ચિતામ્ ॥ ૪૬॥

પ્રણયક્રોધસાચોલીબન્ધગુપ્તિકૃતસ્તનામ્ ।
સપત્નીવક્ત્રહૃચ્છોશિયશઃશ્રીકચ્છપીરવામ્ ॥ ૪૭॥

મધ્યતાત્મસખીસ્કન્ધલીલાન્યસ્તકરામ્બુજામ્ ।
શ્યામાં શ્યામસ્મરામોદમધુલીપરિવેશિકામ્ ॥ ૪૮॥

સુભગવલ્ગુવિચ્છોલીમૌલીભૂષણમઞ્જરી ।
આવૈકુણ્ઠમજાણ્ડાલિવતંસીકૃતસદ્યશઃ ॥ ૪૯॥

વૈદગ્ધ્યૈકસુધાસિન્ધુશ્ચાટુર્યૈકસુધાપુરી ।
માધુર્યૈકસુધાવલ્લી ગુણરત્નૈકપેટિકા ॥ ૫૦॥

ગોવિન્દાનઙ્ગરાજીવે ભાનુશ્રીર્વાર્ષભાનવી ।
કૃષ્ણહૃત્કુમુદોલ્લાસે સુધાકારકરસ્થિતિઃ ॥ ૫૧॥

કૃષ્ણમાનસહંસસ્ય માનસી સરસી વરા ।

કૃષ્ણચાતકજીવાતુનવામ્ભોદપયઃશ્રુતિઃ ॥ ૫૨॥

સિદ્ધાઞ્જનસુધાવાર્તિઃ કૃષ્ણલોચનયોર્દ્વયોઃ ।
વિલાસશ્રાન્તકૃષ્ણાઙ્ગે વાતલી માધવી મતા ॥ ૫૩॥

મુકુન્દમત્તમાતઙ્ગવિહારાપરદીર્ઘિકા ।
કૃષ્ણપ્રાણમહામીનખેલનાનન્દવારિધિઃ ॥ ૫૪॥

ગિરીન્દ્રધારિરોલમ્બરસાલનવમઞ્જરી ।
કૃષ્ણકોકિલસમ્મોદિમન્દરોદ્યાનવિસ્તૃતિઃ ॥ ૫૫॥

કૃષ્ણકેલિવરારામવિહારાદ્ભુતકોકિલા ।
નાદાકૃષ્ટબકદ્વેષિવીરધીરમનોમૃગા ॥ ૫૬॥

પ્રણયોદ્રેકસિદ્ધ્યેકવશિકૃતધૃતાચલા ।
માધવાતિવશા લોકે માધવી માધવપ્રિયા ॥ ૫૭॥

કૃષ્ણમઞ્જુલતાપિઞ્છે વિલસત્સ્વર્ણયૂથિકા ।
ગોવિન્દનવ્યપાથોદે સ્થિરવિદ્યુલ્લતાદ્ભુતા ॥ ૫૮॥

ગ્રીષ્મે ગોવિન્દસર્વાઙ્ગે ચન્દ્રચન્દનચન્દ્રિકા ।
શીતે શ્યામશુભાઙ્ગેષુ પીતપટ્ટલસત્પટી ॥ ૫૯॥

મધૌ કૃષ્ણતરૂલ્લાસે મધુશ્રીર્મધુરાકૃતિઃ ।
મઞ્જુમલ્લારરાગશ્રીઃ પ્રાવૃષી શ્યામહર્ષિણી ॥ ૬૦॥

ઋતૌ શરદિ રાસૈકરસિકેન્દ્રમિહ સ્ફુટમ્ ।
વરિતું હન્ત રાસશ્રીર્વિહરન્તી સખીશ્રિતા ॥ ૬૧॥

હેમાન્તે સ્મરયુદ્ધાર્થમટન્તં રાજનન્દનમ્ ।
પૌરુષેણ પરાજેતું જયશ્રીર્મૂર્તિધારિણી ॥ ૬૨॥

સર્વતઃ સકલસ્તવ્યવસ્તુતો યત્નતશ્ચિરાત્ ।
સારણાકૃષ્ય તૈર્યુક્ત્યા નિર્માયાદ્ભુતશોભયા ॥ ૬૩॥

સ્વશ્લાઘં કુર્વતા ફુલ્લવિધિના શ્લાઘિતા મુહુઃ ।
ગૌરીશ્રીમૃગ્યસૌન્દર્યવન્દિતશ્રીનખપ્રભા ॥ ૬૪॥

શરત્સરોજશુભ્રાંશુમણિદર્પનમાલયા ।
નિર્મઞ્છિતમુખામ્ભોજવિલસત્સુષમકણા ॥ ૬૫॥

સ્થાયીસઞ્ચારિસૂદ્દીપ્તસત્ત્વિકૈરનુભાવકૈઃ ।
વિભાવાદ્યૈર્વિભાવોઽપિ સ્વયં શ્રીરસતાં ગતા ॥ ૬૬॥

સૌભાગ્યદુન્દુભિપ્રોદ્યદ્ધ્વનિકોલાહલૈઃ સદા ।
વિત્રસ્તીકૃતગર્વિષ્ઠવિપક્ષાખિલગોપિકા ॥ ૬૭॥

વિપક્ષલક્ષાહૃત્કમ્પાસમ્પાદકમુખશ્રિયા ।
વશીકૃતબકારાતિમાનસા મદનાલસા ॥ ૬૮॥

કન્દર્પકોટિરમ્યશ્રીજયિશ્રીગિરિધારિણા ।
ચઞ્ચલાપઙ્ગભઙ્ગેન વિસ્મારિતસતીવ્રતા ॥ ૬૯॥

કૃષ્ણેતિવર્ણયુગ્મોરુમોહમન્ત્રેણ મોહિતા ।
કૃષ્ણદેહવરામોદહૃદ્યમાદનમાદિતા ॥ ૭૦॥

કુટિલભ્રૂચલાચણ્ડકન્દર્પોદ્દણ્ડકર્મુકા ।
ન્યસ્તાપઙ્ગશરક્ષેપૈર્વિહ્વલીકૃતમાધવા ॥ ૭૧॥

નિજાઙ્ગસૌરભોદ્ગારમદકૌષધિવાત્યયા ।
ઉન્મદીકૃતસર્વૈકમદકપ્રવરાચ્યુતા ॥ ૭૨॥

દૈવાચ્છ્રુતિપથાયાતનામનીહારવાયુના ।
પ્રોદ્યદ્રોમાઞ્ચશીત્કારકમ્પિકૃષ્ણમનોહરા ॥ ૭૩॥

કૃષ્ણનેત્રલસઞ્જિહ્વાલેહ્યવક્ત્રપ્રભામૃતા ।
કૃષ્ણાન્યતૃષ્ણાસંહારી સુધાસારૈકઝર્ઝરી ॥ ૭૪॥

રાસલાસ્યરસોલ્લાસવશીકૃતબલાનુજા ।
ગાનફુલ્લીકૃતોપેન્દ્રા પિકોરુમધુરસ્વરા ॥ ૭૫॥

કૃષ્ણકેલિસુધાસિન્ધુમકરી મકરધ્વજમ્ ।
વર્ધયન્તી સ્ફુટં તસ્ય નર્માસ્ફલનખેલયા ॥ ૭૬॥

ગતિર્મત્તગજઃ કુમ્ભૌ કુચૌ ગન્ધમદોદ્ધુરૌ ।
મધ્યમુદ્દામસિંહોઽયં ત્રિબલ્યો દુર્ગભિત્તયઃ ॥ ૭૭॥

રોમાલી નાગપાશશ્રીર્નિતમ્બો રથ ઉલ્બનઃ ।
દાન્તા દુર્દન્તસામાન્તાઃ પાદાઙ્ગુલ્યઃ પદાતયઃ ॥ ૭૮॥

પાદૌ પદતિકાધ્યક્ષૌ પુલકઃ પૃથુકઙ્કુતઃ ।
ઊરૂ જયમણિસ્તમ્ભૌ બાહૂ પાશવરૌ દૃઢૌ ॥ ૭૯॥

ભ્રૂદ્વન્દ્વં કર્મુકં ક્રૂરં કટાક્ષાઃ શનિતાઃ શરાઃ ।
ભાલમર્ધેન્દુદિવ્યાસ્ત્રમઙ્કુશાણિ નખાઙ્કુરાઃ ॥ ૮૦॥

સ્વર્ણેન્દુફલકં વક્ત્રં કૃપણી કરયોર્દ્યુતિઃ ।
ભલ્લભારઃ કરાઙ્ગુલ્યો ગણ્ડૌ કનકદર્પનૌ ॥ ૮૧॥

કેશપાશઃ કટુક્રોધઃ કર્ણૌ મૌર્વગુણોત્તમૌ ।
બન્ધુકાધરરાગોઽતિપ્રતાપઃ કરકમ્પકઃ ॥ ૮૨॥

દુન્દુભ્યાદિરવશ્ચૂડાકિઙ્કિનીનૂપુરસ્વનઃ ।
ચિબુકં સ્વસ્તિકં શાસ્તં કણ્ઠઃ શઙ્ખો જયપ્રદઃ ॥ ૮૩॥

પરિષ્વઙ્ગો હિ વિદ્ધ્યસ્ત્રં સૌરભં મદકૌષદમ્ ।
વાણી મોહનમન્ત્રશ્રીર્દેહબુદ્ધિવિમોહિની ॥ ૮૪॥

નાભી રત્નાદિભાણ્ડારં નાસાશ્રીઃ સકલોન્નતા ।
સ્મિતલેશોઽપ્યચિન્ત્યાદિ વશીકરણતન્ત્રકઃ ॥ ૮૫॥

અલકાનાં કુલં ભીષ્મં ભૃઙ્ગાસ્ત્રં ભઙ્ગદાયકમ્ ।
મૂર્તિઃ કન્દર્પયુદ્ધશ્રીર્વેણી સઞ્જયિની ધ્વજા ॥ ૮૬॥

ઇતિ તે કામસઙ્ગ્રામસામગ્યો દુર્ઘટાઃ પરૈઃ ।
ઈદૃશ્યો લલિતાદીનાં સેનાનીનાં ચ રાધિકે ॥ ૮૭॥

અતો દર્પમદાઘૂતં દાનીન્દ્રમવધીર્ય મામ્ ।
મહામારમહારાજનિયુક્તં પ્રથિતં વ્રજે ॥ ૮૮॥

સુષ્ઠુ સીમાન્તસિન્દૂર તિલકાનાં વરત્વિષામ્ ।
હારાઙ્ગદાદિચોલીનાં નાસામૌક્તિકવાસસામ્ ॥ ૮૯॥

કેયૂરમુદ્રિકાદીનાં કજ્જલોદ્યદ્વતંસયોઃ ।
એતાવદ્યુદ્ધવસ્તૂનાં પરાર્ધ્યાનાં પરર્ધ્યતઃ ॥ ૯૦॥

તથા દધ્યાદિગવ્યાનામમૂલ્યાનાનાં વ્રજોદ્ભવાત્ ।
અદત્ત્વા મે કરં ન્યાય્યં ખેલન્ત્યો ભ્રમતેહ યત્ ॥ ૯૧॥

તતો મયા સમં યુદ્ધં કર્તુમિચ્છત બુધ્યતે ।
કિં ચૈકોઽહં શતં યૂયં કુરુધ્વં ક્રમશસ્તતઃ ॥ ૯૨॥

પ્રથમં લલિતોચ્ચણ્ડા ચરતાચ્ચણ્ડસઙ્ગરમ્ ।

તતસ્ત્વં તદનુ પ્રેષ્ઠસઙ્ગરાઃ સકલાઃ ક્રમાત્ ॥ ૯૩॥

અથ ચેન્મિલિતાઃ કર્તું કામયધ્વે રણં મદાત્ ।
અગ્રે સરત તદ્દોર્ભ્યાં પિનષ્મિ સકલાઃ ક્ષણાત્  ॥ ૯૪॥

ઇતિ કૃષ્ણવચઃ શ્રુત્વા સાટોપં નર્મનિર્મિતમ્ ।
સાનન્દં મદનાક્રાન્તમાનસાલિકુલાન્વિતા ॥ ૯૫॥

સ્મિત્વા નેત્રાન્તબાણૈસ્તં સ્તબ્ધીકૃત્ય મદોદ્ધતમ્ ।
ગચ્છન્તી હંસવદ્ભઙ્ગ્યા સ્મિત્વા તેન ધૃતાઞ્ચલા ॥ ૯૬॥

લીલયાઞ્ચલમાકૃષ્ય ચલન્તી ચારુહેલયા ।
પુરો રુદ્ધપથં તં તુ પશ્યન્તી રુષ્ટયા દૃશા ॥ ૯૭॥

માનસસ્વર્ધુનીં તૂર્ણમુત્તરીતું તરીં શ્રિતા ।
કમ્પિતાયાં તરૌ ભીત્યા સ્તુવન્તી કૃષ્ણનાવિકમ્ ॥ ૯૮॥

નિજકુણ્ડપયઃકેલિલીલાનિર્જિતમચ્યુતમ્ ।
હસિતું યુઞ્જતી ભઙ્ગ્યા સ્મેરા સ્મેરમુખીઃ સખીઃ ॥ ૯૯॥

મકન્દમકુલસ્યન્દિમરન્દસ્યન્દિમન્દિરે ।
કેલિતલ્પે મુકુન્દેન કુન્દવૃન્દેન મણ્ડિતા ॥ ૧૦૦॥

નાનાપુષ્પમણિવ્રાતપિઞ્છાગુઞ્જાફલાદિભિઃ ।
કૃષ્ણગુમ્ફિતધમ્મિલ્લોત્ફુલ્લરોમસ્મરઙ્કુરા ॥ ૧૦૧॥

મઞ્જુકુઞ્જે મુકુન્દસ્ય કુચૌ ચિત્રયતઃ કરમ્ ।
ક્ષપયન્તી કુચક્ષેપૈઃ સુસખ્યમધુનોન્મદા ॥ ૧૦૨॥

વિલાસે યત્નતઃ કૃષ્ણદત્તં તામ્બૂલચર્વિતમ્ ।
સ્મિત્વા વામ્યાદગૃહ્ણાના તત્રારોપિતદૂષણમ્ ॥ ૧૦૩॥

દ્યૂતે પાણિકૃતાં વંશીં જિત્વા કૃષ્ણસુગોપિતામ્ ।
હસિત્વાચ્છિદ્ય ગૃહ્ણાના સ્તુતા સ્મેરાલિસઞ્ચયૈઃ ॥ ૧૦૪॥

વિશાખાગૂઢનર્મોક્તિજિતકૃષ્ણાર્પિતસ્મિતા ।
નર્માધ્યાયવરાચાર્યા ભારતીજયવાગ્મિતા ॥ ૧૦૫॥

વિશાખાગ્રે રહઃકેલિકથોદ્ઘાટકમાધવમ્ ।
તાડયન્તી દ્વિરબ્જેન સભ્રૂભઙ્ગેન લીલયા ॥ ૧૦૬॥

લલિતાદિપુરઃ સાક્ષાત્કૃષ્ણસમ્ભોગલઞ્છને ।
સૂચ્યમાને દૃશા દૂત્યા સ્મિત્વા હુઙ્કુર્વતી રુષા ॥ ૧૦૭॥

ક્વચિત્પ્રણયમાનેન સ્મિતમાવૃત્ય મૌનિની ।
ભીત્યા સ્મરશરૈર્ભઙ્ગ્યલિઙ્ગન્તી સસ્મિતં હરિમ્  ॥ ૧૦૮॥

કુપિતં કૌતુકૈઃ ક્ર્ષ્ણં વિહારે બાઢમૌનિનમ્ ।
કતરા પરિરભ્યાશુ માનયન્તી સ્મિતાનનમ્ ॥ ૧૦૯॥

મિથઃ પ્રણયમાનેન મૌનિની મૌનિનં હરિમ્ ।
નિર્મૌના સ્મરમિત્રેણ નિર્મૌનં વીક્ષ્ય સસ્મિતા ॥ ૧૧૦॥

ક્વચિત્પથિ મિલાચન્દ્રાવલીસમ્ભોગદૂષણમ્ ।
શ્રુત્વા ક્રૂરસખીવક્ત્રાન્મુકુન્દે માનિની રુષા ॥ ૧૧૧॥

પાદલક્ષારસોલ્લાસિશિરસ્કં કંસવિદ્વિષમ્ ।
કૃતકાકુશતં સાસ્રા પશ્યન્તીષાચલદૃશા ॥ ૧૧૨॥

ક્વચિત્કલિન્દજાતીરે પુષ્પત્રોટનખેલયા ।
વિહરન્તી મુકુન્દેન સાર્ધમાલીકુલાવૃતા ॥ ૧૧૩॥

તત્ર પુષ્પકૃતે કોપાદ્વ્રજન્તી પ્રેમકારિતાત્ ।
વ્યાઘોતિતા મુકુન્દેન સ્મિત્વા ધૃત્વા પટાઞ્ચલમ્ ॥ ૧૧૪॥

વિહારશ્રાન્તિતઃ કાન્તં લલિતાન્યસ્તમસ્તકમ્ ।
વીજયન્તી સ્વયં પ્રેમણા કૃષ્ણં રક્તપટાઞ્ચલૈઃ ॥ ૧૧૫॥

પુષ્પકલ્પિતદોલાયાં કલગાનકુતૂહલૈઃ ।
પ્રેમણા પ્રેષ્ઠસખીવર્ગૈર્દોલિતા હરિભૂષિતા ॥ ૧૧૬॥

કુણ્ડકુઞ્જાઙ્ગને વલ્ગુ ગાયદાલીગણાન્વિતા ।
વીણાનન્દિતગોવિન્દદત્તચુમ્બેન લજ્જિતા ॥ ૧૧૭॥

ગોવિન્દવદનામ્ભોજે સ્મિત્વા તામ્બૂલવીટિકામ્ ।
યુઞ્જતીહ મિથો નર્મકેલિકર્પૂરવાસિતામ્ ॥ ૧૧૮॥

ગિરીન્દ્રગાહ્વરે તલ્પે ગોવિન્દોરસિ સાલસમ્ ।
શયના લલિતાવીજ્યમાના સ્વીયપટાઞ્ચલૈઃ ॥ ૧૧૯॥

અપૂર્વબન્ધગાન્ધર્વાકલયોન્મધ્ય માધવમ્ ।
સ્મિત્વા હરિતતદ્વેણુહારા સ્મેરવિશાખયા ॥ ૧૨૦॥

વીણાધ્વનિધુતોપેન્દ્રહસ્તાચ્ચ્યોતિતવંશિકા ।
ચૂડાસ્વનહૃતશ્યામદેહગેહપથસ્મૃતિઃ  ॥ ૧૨૧॥

મુરલીગિલિતોત્તુઙ્ગગૃહધર્મકુલસ્થિતિઃ ।
શૃઙ્ગતો દત્તતત્સર્વસતિલાપોઽઞ્જલિત્રયા ॥ ૧૨૨॥

કૃષ્ણપુષ્ટિકરામોદિસુધાસારાધિકાધરા ।
સ્વમધુરિત્વસમ્પાદિકૃષ્ણપાદામ્બુજામૃતા  ॥ ૧૨૩॥

રાધેતિ નિજનામ્નૈવ જગત્ખ્યાપિતમાધવા ।
માધવસ્યૈવ રાધેતિ જ્ઞાપિતાત્મા જગત્ત્રયે ॥ ૧૨૪॥

મૃગનાભેઃ સુગન્ધશ્રીરિવેન્દોરિવ ચન્દ્રિકા ।
તરોઃ સુમઞ્જરીવેહ કૃષ્ણસ્યાભિન્નતાં ગતા ॥ ૧૨૫॥

રઙ્ગિના સઙ્ગરઙ્ગેન સાનઙ્ગરઙિનીકૃતા ।
સાનઙ્ગરઙ્ગભઙ્ગેન સુરઙ્ગીકૃતરઙ્ગદા ॥ ૧૨૬॥

ઇત્યેતન્નામલીલાક્તપદ્યૈઃ પીયૂષવર્ષકૈઃ ।
તદ્રસાસ્વાદનિષ્ણાતવસનાવાસિતાન્તરૈઃ ॥ ૧૨૭॥

ગીયમાનં જનૈર્ધન્યૈઃ સ્નેહવિક્લિન્નમાનસૈઃ ।
નત્વા તાં કૃપયાવિષ્ટાં દુષ્ટોઽપિ નિષ્ઠુરઃ શઠઃ ॥ ૧૨૮॥

જનોઽયં યાચતે દુઃખી રુદન્નુચ્ચૈરિદં મુહુઃ ।
તત્પદામ્ભોજયુગ્મૈકગતિઃ કાતરતાં ગતઃ ॥ ૧૨૯॥

કૃત્વા નિજગણસ્યાન્તઃ કારુણ્યાન્નિજસેવને ।
નિયિજયતુ માં સાક્ષાત્સેયં વૃન્દાવનેશ્વરી ॥ ૧૩૦॥

ભજામિ રાધામરવિન્દનેત્રાં
    સ્મરામિ રાધાં મધુરસ્મિતાસ્યામ્ ।
વદામિ રાધાં કરુણભરાર્દ્રાં
    તતો મમાન્યાસ્તિ ગતિર્ન કાપિ ॥ ૧૩૧॥

લીલાનામાઙ્કિતસ્તોત્રં વિશાખાનન્દદાભિધમ્ ।
યઃ પઠેન્નિયતં ગોષ્ઠે વસેન્નિર્ભરદીનધીઃ ॥ ૧૩૨॥

આત્માલઙ્કૃતિરાધાયાં પ્રીતિમુત્પદ્ય મોદભાક્

નિયોજયતિ તાં કૃષ્ણઃ સાક્ષાત્તત્પ્રિયસેવને ॥ ૧૩૩॥

શ્રીમદ્રૂપપદામ્ભોજધૂલીમાત્રૈકસેવિના
કેનચિદ્ગ્રથિતા પદ્યૈર્માલાઘ્રેયા તદાશ્રયૈઃ ॥ ૧૩૪॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીવિશાખાનન્દાભિધસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Mukundashtakam ॥ શ્રીમુકુન્દાષ્ટકમ્ ॥

બલભિદુપલકાન્તિદ્રોહિણિ શ્રીમદઙ્ગે
 ઘુસૃણરસવિલાસૈઃ સુષ્ઠુ ગાન્ધર્વિકાયાઃ ।
સ્વમદનનૃપશોભાં વર્ધયન્દેહરાજ્યે
 પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૧॥

ઉદિતવિધુપરાર્ધજ્યોતિરુલ્લઙ્ઘિવક્ત્રો
 નવતરુણિમરજ્યદ્બાલ્યશેષાતિરમ્યઃ ।
પરિષદિ લલિતાલીં દોલયન્કુણ્ડલાભ્યાં
 પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૨॥

કનકનિવહશોભાનિન્દિ પીતં નિતમ્બે
 તદુપરિ નવરક્તં વસ્ત્રમિત્થં દધાનઃ ।
પ્રિયમિવ કિલ વર્ણં રાગયુક્તં પ્રિયાયાઃ
 પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૩॥

સુરભિકુસુમવૃન્દૈર્વાસિતામ્ભઃસમૃદ્ધે
 પ્રિયસરસિ નિદાઘે સાયમાલીપરીતા ।
મદનજનકશેકૈઃ ખેલયન્નેવ રાધાં
 પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૪॥

પરિમલમિહ લબ્ધ્વા હન્ત ગાન્ધર્વિકાયાઃ
 પુલકિતતનુરુચ્ચૈરુન્મદસ્તત્ક્ષણેન ।
નિખિલવિપિનદેશાન્વાસિતાનેવ જિઘ્ર-
 ન્પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૫॥

પ્રણિહિતભુજદણ્ડઃ સ્કન્ધદેશે વરાઙ્ગ્યાઃ
 સ્મિતવિકસિતગણ્ડે કીર્તિદાકન્યકાયાઃ ।

મનસિજજનિસૌખ્યં ચુમ્બનેનૈવ તન્વ-
    ન્પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૬॥

પ્રમદદનુજગોષ્ઠ્યાઃ કોઽપિ સંવર્તવહ્નિ-
    ર્વ્રજભુવિ કિલ પિત્રોર્મૂર્તિમાન્સ્નેહપુઞ્જઃ ।
પ્રથમરસમહેન્દ્રઃ શ્યામલો રાધિકાયાઃ
    પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૭॥

સ્વકદનકથયાઙ્ગીકૃત્ય મૃદ્વીં વિશાખાં
    કૃતચટુ લલિતાં તુ પ્રાર્થયન્પ્રૌઢશીલામ્ ।
પ્રણયવિધુરરાધામાનવિધ્વંસનાય
    પ્રણયતુ મમ નેત્રાભીષ્ટસિદ્ધિં મુકુન્દઃ ॥ ૮॥

પરિપઠતિ મુકુન્દસ્યાષ્ટકં કાકુભિર્યઃ
    સકલવિષયસઙ્ગાત્સન્નિયમ્યેન્દ્રિયાણિ ।
વ્રજનવયુવરાજો દાર્શયન્સ્વં સરાધે
    સ્વજનગણનમધ્યે તં પ્રિયાયાસ્તનોતિ ॥ ૯॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        શ્રીમદનગોપાલસ્તોત્રં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Utkanthadashakam ॥ ઉત્કણ્ઠાદશકમ્ ॥

છિન્નસ્વર્ણવિનિન્દિચિક્કણરુચિં સ્મેરાં વયઃસન્ધિતો
  રમ્યાં રક્તસુચીનપટ્ટવસનાં વેશેન વિભ્રાજિતામ્ ।
ઉદ્ઘૂર્ણાચ્છિતિકણ્ઠપિઞ્છવિલસદ્વેણીં મુકુન્દં મનાક્
  પશ્યન્તીં નયનાઞ્ચલેન મુદિતાં રાધાં કદાહં ભજે ॥ ૧॥

યસ્યાઃ કાન્તતનૂલ્લસત્પરિમલેનાકૃષ્ટ ઉચ્ચૈઃ સ્ફુર-
  દ્ગોપીવૃન્દમુખારવિન્દમધુતત્પ્રીત્યા ધયન્નપ્યદઃ ।
મુઞ્ચન્વર્ત્મનિ બમ્ભ્રમીતિ મદતો ગોવિન્દભૃઙ્ગઃ સતાં
  વૃન્દારણ્યવરેણ્યકલ્પલતિકાં રાધાં કદાહં ભજે ॥ ૨॥

શ્રીમત્કુણ્ડતટીકુડુઙ્ગભવને ક્રીડાકલાનાં ગુરું
  તલ્પે મઞ્જુલમલ્લિકોમલદલૈઃ ક્લૃપ્તે મુહુર્માધવમ્ ।
જિત્વા માનિનમક્ષસઙ્ગરવિધૌ સ્મિત્વા દૃગન્તોત્સવૈ-
  ર્યુઞ્જાનાં હસિતું સખીં પરમહો રાધાં કદાહં ભજે ॥ ૩॥

રાસે પ્રેમરસેન કૃષ્ણવિધુના સાર્ધં સખીભિર્વૃતાં
  ભાવૈરષ્ટભિરેવ સાત્ત્વિકતરૈર્લાસ્યં રસૈસ્તન્વતીમ્ ।
વીણાવેણુમૃદઙ્ગકિઙ્કિણિચલન્મઞ્જીરચૂડોચ્છલ-
  દ્ધ્વાનૈઃ સ્ફીતસુગીતમઞ્જુનિતરાં રાધાં કદાહં ભજે ॥ ૪॥

ઉદ્દામસ્મરકેલિસઙ્ગરભરે કામં વનાન્તઃખલે
  કૃષ્ણેનાઙ્કિતપીનપર્વતકુચદ્વન્દ્વાં નખૈરસ્ત્રકૈઃ ।
તદ્દર્પેણ તથા મદોદ્ધુરમહો તં વિદ્ધમાકુર્વતીં
  દૂરે સ્વાલિકુલૈઃ કૃતાશિષમહો રાધાં કદાહં ભજે ॥ ૫॥

મિત્રાણાં નિકરૈર્વૃતેન હરિણા સ્વૈરં ગિરીન્દ્રાન્તિકે
  શુલ્કાદાનમિષેણ વર્ત્મનિ હઠાદ્દમ્ભેન રુદ્ધાઞ્ચલામ્ ।

સાર્ધં સ્મેરસખીભિરુદ્ધુરગિરાં ભઙ્ગ્યા ક્ષિપન્તીં રુષા
 ભ્રૂદર્પૈર્વિલસચ્ચકોરનયનાં રાધાં કદાહં ભજે ॥ ૬॥

પારાવારવિહારકૌતુકમનઃપૂરેણ કંસારિણા
 સ્ફારે માનસજાહ્નવીજલભરે તર્યાં સૌમુત્થાપિતામ્ ।
જીર્ણા નૌર્મમ ચેત્સ્ખલેદિતિ મિષાચ્છાયાદ્વિતીયાં મુદા
 પારે ખણ્ડિતકઞ્ચુલીં ધૃતકુચાં રાધાં કદાહં ભજે ॥ ૭॥

ઉલ્લાસૈર્જલકેલિલોલુપમનઃપૂરે નિદાઘોદ્ગમે
 ક્ષ્વેલીલમ્પટમાનસાભિરમિતઃ સાયં સખીભિર્વૃતામ્ ।
ગોવિન્દં સરસિ પ્રિયેઽત્ર સલિલક્રીડાવિદગ્ધં કણૈઃ
 સિઞ્ચન્તીં જલયન્ત્રકેણ પયસાં રાધાં કદાહં ભજે ॥ ૮॥

વાસન્તીકુસુમોત્કરેણ પરિતઃ સૌરભ્યવિસ્તારિણા
 સ્વેનાલઙ્કૃતિસઞ્ચયેન બહુધાવિર્ભાવિતેન સ્ફુટન્।
સોત્કમ્પં પુલકોદ્ગમૈર્મુરભિદા દ્રાગ્ભૂષિતાઙ્ગીં ક્રમૈ-
 ર્મોદિનાશ્રુભરૈઃ પ્લુતાં પુલકિતાં રાધાં કદાહં ભજે ॥ ૯॥

પ્રાણેભ્યોઽપ્યધિકપ્રિયા મુરરિપોર્યા હન્ત યસ્યા અપિ
 સ્વીયપ્રાણપરાર્ધતોઽપિ દયિતાસ્તત્પાદરેણોઃ કણાઃ ।
ધન્યાં તાં જગતીત્રયે પરિલસજ્જઙ્ઘાલકીર્તિં હરેઃ
 પ્રેષ્ઠાવર્ગશિરોઽગ્રભૂષણમણિં રાધાં કદાહં ભજે ॥ ૧૦॥

ઉત્કણ્ઠાદશકસ્તવેન નિતરાં નવ્યેન દિવ્યૈઃ સ્વરૈ-
 ર્વૃન્દારણ્યમહેન્દ્રપટ્ટમહિષીં યઃ સ્તૌતિ સમ્યક્સુધીઃ ।
તસ્મૈ પ્રાણસમાગુણાનુરસનાત્સઞ્જાતહર્ષોત્સવૈઃ
 કૃષ્ણોઽનર્ઘમભીષ્ટરત્નમચિરાદેતત્સ્ફુટં યચ્છતિ ॥ ૧૧॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યામુત્કણ્ઠાદશકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Navayuvadvandvadidrikshashtakam ॥ શ્રીનવયુવદ્વન્દ્વદિદૃક્ષાષ્ટકમ્ ॥

સ્ફુરદમલમધૂલીપૂર્ણરાજીવરાજ-
ન્નવમૃગમદગન્ધદ્રોહિદિવ્યાઙ્ગગન્ધં
મિથ ઇહ ઉદિતૈરુન્માદિતાન્તર્વિઘૂર્ણ-
દ્વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૧॥

કનકગિરિખલોદ્યત્કેતકીપુષ્પદીવ્ય-
ન્નવજલધરમાલાદ્વેષિદિવ્યોરુકાન્ત્યા ।
સબલમિવ વિનોદૈરીક્ષયાત્સ્વં મિથસ્ત-
દ્વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૨॥

નિરુપમનવગૌરીનવ્યકન્દર્પકોટિ
પ્રહિતમધુરિમોર્મિક્ષાલિતશ્રીનખાન્તમ્ ।
નવનવરુચિરાગૈર્હૃષ્ટમિષ્ટૈર્મિથસ્ત-
દ્વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૩॥

મદનરસવિઘૂર્ણન્નેત્રપદ્માન્તનૃત્યૈઃ
પરિકલિતમુખેન્દુહ્રીવિનામ્રં મિથોઽલ્પૈઃ ।
અપિ ચ મધુરવાચં શ્રોતુમાવર્ધિતાશં
વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૪॥

સ્મરસમરવિલાસોદ્ધારમઙ્ગેષુ રઙ્ગૈ-
સ્તિમિતનવસખીષુ પ્રેક્ષમાનાસુ ભઙ્ગ્યા ।
સ્મિતમધુરદૃગન્તૈર્હ્રીણસમ્ફુલ્લવક્ત્રં
વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૫॥

મદનસમરચર્યાચાર્યમાપૂર્ણપુણ્ય
પ્રસરનવવધૂભિઃ પ્રાર્થ્યપાદાનુચર્યમ્ ।

સ્મરરસિકમેકપ્રાણમન્યોન્યભૂષં
　　વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૬॥

તટમધુરનિકુઞ્જે શ્રાન્તયોઃ શ્રીસરસ્યઃ
　　પ્રચુરજલવિહારૈઃ સ્નિગ્ધવૃન્દૈઃ સખીનામ્ ।
ઉપહૃતમધુરઙ્ગૈઃ પાયયાત્તન્મિથસ્તૈ-
　　ર્વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૭॥

કુસુમશરરસૌઘગ્રન્થિભિઃ પ્રેમદામ્ના
　　મિથ ઇહ વશવૃત્ત્યા પ્રૌઢયાદ્ધા નિબદ્ધમ્ ।
અખિલજગતિ રાધામાધવાખ્યપ્રસિદ્ધં
　　વ્રજભુવિ નવયૂનોર્દ્વન્દ્વરત્નં દિદૃક્ષે ॥ ૮॥

પ્રણયમધુરમુચ્ચૈર્નવ્યયૂનોર્દિદૃક્ષા
　　ષ્ટકમિદમતિયત્નાદ્યઃ પઠેત્સ્ફારદૈન્યૈઃ ।
સ ખલુ પરમશોભાપુઞ્જમઞ્જુ પ્રકામં
　　યુગલમતુલમક્ષ્ણોઃ સેવ્યમારાત્કરોતિ ॥ ૯॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
　　　શ્રીનવયુવદ્વન્દ્વદિદૃક્ષાષ્ટકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Abhishtaprarthanashtakam ॥ અભીષ્ટપ્રાર્થનાષ્ટકમ્ ॥

કદા ગોષ્ઠે ગોષ્ઠક્ષિતિપગૃહદેવ્યા કિલ તયા
 સબાષ્પં કુર્વત્યા વિલસતિ સુતે લાલનવિધિમ્ ।
મુહુર્દૃષ્ટં રોહિણ્યપીહિતનિવેશામવનતં
 નિષેવે તામ્બૂલૈરહમપિ વિશાખાપ્રિયસખીમ્ ॥ ૧॥

કદા ગાન્ધર્વાયાં શુચિ વિરચયન્ત્યાં હરિકૃતે
 મુદા હારાન્વૃન્દૈઃ સહ સવયસામાત્મસદને ।
વિચિત્ય શ્રીહસ્તે મણિમિહ મુહુઃ સમ્પુટચયા-
 દહો વિન્યસ્યન્તી સફલયતિ સેયં ભુજલતામ્ ॥ ૨॥

કદા લીલારાજ્યે વ્રજવિપિનરૂપે વિજયિની
 નિજં ભાગ્યં સાક્ષાદિહ વિદધતી વલ્લભતયા ।
સમન્તાદ્ક્રીડન્તી પિકમધુપમુખ્યાભિરભિતઃ
 પ્રજાભિઃ સઞ્જુષ્ટા પ્રમદયતિ સા માં મદધિપા ॥ ૩॥

કદા કૃષ્ણાતીરે ત્રિચતુરસખીભિઃ સમમહો
 પ્રસૂનાં ગુમ્ફન્તીં રવિસખસુતામાનતતયા ।
સમેત્ય પ્રચ્છન્નં સપદિ પરિરિપ્સોર્બકરિપો-
 ર્નિષેધે ભ્રૂભઙ્ગં ભૃશમનુભજેઽહમ્ વ્યજનિની ॥ ૪॥

કદા શુભ્રે તસ્મિન્પુલિનવલયે રાસમહસા
 સુવર્ણાઙ્ગીસઙ્ઘેષ્ટહમહમિકામત્તમતિષુ ।
હરૌ યાતે નીલોત્પલનિકસતાં જિત્વરગુણા-
 દ્ગુણાદસ્માન્દિવ્યદ્રવિણમિવ રાધા મદયતિ ॥ ૫॥

કદા ભાણ્ડીરસ્ય પ્રથિતરુચિરોત્સઙ્ગનિલયે
 વરામધ્યાસીનં કુસુમમયતૂલીમતુલિતમ્ ।

પ્રિયે ચિત્રં પત્રં લિખતિ નિહિતસ્વઙ્ગલતિકાં
    વિશાખાપ્રાણાલીં ભજતિ દિશતી વર્ણકમસૌ ॥ ૬॥

કદા તુઙ્ગે તુઙ્ગે રહસિ ગિરિશ‍ૃઙ્ગે વ્રતતિજા-
    ન્પ્રિયે પૂર્વા લીલા નિગમયતિ સંસ્તવ્ય નિલયાન્।
મદેનાવિષ્પષ્ટં સકલિતપદં વ્રીડિતતયા
    દ્રુતમૌત્કયેનૈષા વિરચયતિ પૃચ્છાં મમ પુરઃ ॥ ૭॥

ગતિર્યન્મે નિત્યા યદખિલમપિ સ્વં સવયસામ્
    મદીશ્વર્યાઃ પ્રેષ્ઠપ્રણયકૃતસૌભાગ્યવરિમા ।
હરેર્યત્પ્રેમશ્રીર્નિવસતિરમુષ્યસ્તુલનયા
    સદા તસ્મિન્કુણ્ડે લસતુ લલિતાલી મમ દૃશી ॥ ૮॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
        અભીષ્ટપ્રાર્થનાષ્ટકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Dananirvartanakundashtakam ॥ શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકમ્ ॥

સ્વદયિતગિરિકચ્છે ગવ્યદાનાર્થમુચ્ચૈઃ
કપટકલહકેલિં કુર્વતોર્નવ્યયૂનોઃ ।
નિજજનકૃતદર્પૈઃ ફુલ્લતોરીક્ષકેઽસ્મિ-
ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૧॥

નિભૃતમજનિ યસ્માદ્દાનનિર્વૃત્તિરસ્મિ-
નત ઇદમભિધાનં પ્રાપ યત્તત્સભાયામ્ ।
રસવિમુખનિગૂઢે તત્ર તજ્જ્ઞૈકવેદ્યે
સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૨॥

અભિનવમધુગન્ધોન્મત્તરોલમ્બસઙ્ઘ
ધ્વનિલલિતસરોજવ્રાતસૌરભ્યશીતે ।
નવમધુરખગાલીક્ષ્વેલિસઞ્ચારકામ્રે
સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૩॥

હિમકુસુમસુવાસસ્ફારપાનીયપૂરે
રસપરિલસદાલીશાલિનોર્નવ્યયૂનોઃ ।
અતુલસલિલખેલાલબ્ધસૌભાગ્યફુલ્લે
સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૪॥

દરવિકસિતપુષ્પૈર્વાસિતાન્તર્દિગન્તઃ
ખગમધુપનિનાદૈર્મોદિતપ્રાણિજાતઃ ।
પરિતૌપરિ યસ્ય ક્ષ્મારુહા ભાન્તિ તસ્મિ-
ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૫॥

નિજનિજનવકુઞ્જે ગુઞ્જિરોલમ્બપુઞ્જે
પ્રણયિનવસખીભિઃ સંપ્રવેશ્ય પ્રિયૌ તૌ ।

નિરુપમનવરઙ્ગસ્તન્યતે યત્ર તસ્મિ-
ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૬॥

સ્ફટિકસમમતુચ્છં યસ્ય પાનીયમચ્છં
ખગનરપશુગોભિઃ સમ્પિબન્તીભિરુચ્ચૈઃ ।
નિજનિજગુણવૃદ્ધિર્લભ્યતે દ્રાગમુસ્મિ-
ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૭॥

સુરભિમધુરશીતં યત્પયઃ પ્રત્યહં તાઃ
સખિગણપરિવીતો વ્યાહરન્પાયયન્ગાઃ ।
સ્વયમથ પિબતિ શ્રીગોપચન્દ્રોઽપિ તસ્મિ-
ન્સરસિ ભવતુ વાસો દાનનિર્વર્તને નઃ ॥ ૮॥

પઠતિ સુમતિરેતદ્દાનનિર્વર્તનાખ્યં
પ્રથિતમહિમકુણ્ડસ્યાષ્ટકં યો યતાત્મા ।
સ ચ નિયતનિવાસં સુષ્ઠુ સંલભ્ય કાલે
કલયતિ કિલ રાધાકૃષ્ણયોર્દાનલીલામ્ ॥ ૯॥

ઇતિ  શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીદાનનિર્વર્તનકુણ્ડાષ્ટકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Shri Prarthanashrayachaturdashakam ॥ શ્રીપ્રાર્થનાશ્રયચતુર્દશકમ્ ॥

અલં દીપાવલ્યાં વિપુલરતિ ગોવર્ધનગિરિં
 જનન્યા સમ્પૂજ્યોજ્જ્વલિતમહિલોદ્ગીતકુતુકૈઃ ।
નિશાદ્ગાવૈઃ પૃષ્ઠે રચિતકરલક્ષ્માશ્રિયમસૌ
 વહન્મેઘધ્વાનૈઃ કલય ગિરિભૃત્ખેલયતિ ગાઃ ॥ ૧॥

પુરો ગોભિઃ સાર્ધં વ્રજનૃપતિમુખ્યા વ્રજજના
 વ્રજન્ત્યેષાં પશ્ચાન્નિખિલમહિલાભિર્વ્રજનૃપા ।
તતો મિત્રવ્રાતૈઃ કૃતવિવિધનર્મા વ્રજશશી
 છલૈઃ પશ્યન્રાધાં સહચરિ પરિક્રામતિ ગિરિમ્ ॥ ૨॥

ઉદઞ્ચત્કારુણ્યામૃતવિતરણૈર્જીવિતજગ-
 દ્ધ્રુવદ્વન્દ્વં ગન્ધૈર્ગુણસુમનસં વાસિતજનમ્ ।
કૃપાં ચેન્મય્યેવં કિરતિ ન તદા ત્વં કુરુ તથા
 યથા મે શ્રીકુણ્ડે સખિ સકલમઙ્ગં નિવસતિ ॥ ૩॥

ઉદ્દામનર્મરસકેલિવિનિર્મિતાઙ્ગં
 રાધામુકુન્દયુગલં લલિતાવિશાખે ।
ગૌરાઙ્ગચન્દ્રમિહ રૂપયુગં ન પશ્ય-
 ન્હા વેદનાઃ કતિ સહે સ્ફુટ રે લલાટ ॥ ૪॥

વ્રજપતિકૃતપર્વાનન્દિનન્દીશ્વરોદ્ય-
 ત્પરિષદિ વદનાન્તઃસ્મેરતાં રાધિકાયાઃ ।
રચયતિ હરિરાદાદૃગ્વિભઙ્ગેન નદ્યાં
 રવિરિવ કમલિન્યઃ પુષ્પકાન્તિં કરેણ ॥ ૫॥

ઉપગિરિ ગિરિધર્તુઃ સુસ્મિતે વક્ત્રબિમ્બે
 ભ્રમતિ નિભૃતરાધા નેત્રભઙ્ગીચ્છલેન ।

અતિતૃષિતચકોરી લાલસેવામ્બુદસ્યો
    પરિ શશિનિ સુધાઢ્યે મધ્ય આકાશદેશમ્ ॥ ૬॥

દ્યુતિજિતરતિગૌરીક્ષ્મારમાસત્યભામા
    વ્રજપુરવરનારીવૃન્દચન્દ્રાવલીકામ્ ।
ગિરિભૃત ઇહ રાધાં તન્વતો મણ્ડિતં તત્-
    તદુપકરણમગ્રે કિં નિધાસ્યે ક્રમેણ ॥ ૭॥

કનકરચિતકુમ્ભદ્વન્દ્વવિન્યાસભઙ્ગી
    રુચિહરકુચયુગ્મં સૌરભોચ્છૂનમસ્યાઃ ।
સપુલકમથ ગન્ધૈશ્ચિત્રિતં કર્તુમિચ્છો-
    ર્ગિરિભૃત ઇહ હસ્તે હન્ત દાસ્યે કદા તાન્॥ ૮॥

કૃષ્ણસ્યાંસે વિનિહિતભુજવલ્લિરુત્ફુલ્લરોમા
    રામા કેયં કલયતિતરં ભૂધરારણ્યલક્ષ્મીમ્ ।
જ્ઞાતં જ્ઞાતં પ્રણયચતુલા વ્યાકુલા રાગપૂરૈ-
    રન્યા કાન્તે સહચરિ વિના રાધિકામીદૃશી વા ॥ ૯॥

અપૂર્વપ્રેમાબ્ધેઃ પરિમલપયઃફેનનિવહૈઃ
    સદા યો જીવાતુર્યમિહ કૃપયાસિઞ્ચદતુલમ્ ।
ઇદાનીં દુર્દૈવાત્પ્રતિપદવિપદ્દાવવલિતો
    નિરાલમ્બઃ સોઽયં કમિહ તં ઋતે યાતુ શરણમ્ ॥ ૧૦॥

શૂન્યાયતે મહાગોષ્ઠં ગિરીન્દ્રોઽજગરાયતે ।
વ્યાઘ્રતુણ્ડાયતે કુણ્ડં જીવાતુરહિતસ્ય મે ॥ ૧૧॥

ન પતતિ યદિ દેહસ્તેન કિં તસ્ય દોષઃ
    સ કિલ કુલિશસારૈર્યદ્વિધાત્રા વ્યધાયી ।
અયમપિ પરહેતુર્ગાઢતર્કેણ દૃષ્ટઃ
    પ્રકટકદનભારં કો વહત્વન્યથા વા ॥ ૧૨॥

ગિરિવરતટકુઞ્જે મઞ્જુવૃન્દાવનેશ
    સરસિ ચ રચયન્શ્રીરાધિકાકૃષ્ણકીર્તિમ્ ।
ધૃતરતિ રમણીયં સંસ્મરંસ્તત્પદાબ્જં
    વ્રજદધિફલમશ્નન્સર્વકાલં વસામિ ॥ ૧૩॥

વસતો ગિરિવરતટકુઞ્જે

લપતઃ શ્રીરાધિકેઽનુ કૃષ્ણેતિ ।
ધાયતો વ્રજદધિતક્કં
નાથ સદા મે દિનાનિ ગચ્છન્તુ ॥ ૧૪॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીપ્રાર્થનાશ્રયચતુર્દશકં સમ્પૂર્ણમ્ ।

# સ્તવાવલીસઙ્ગ્રહઃ

## Abhishtasuchanam ॥ અભીષ્ટસૂચનમ્ ॥

આભીરપલ્લીપતિપુત્રકાન્તા-
    દાસ્યાભિલાસાતિબલાશ્વવારઃ ।
શ્રીરૂપચિન્તામણિસન્નિસંસ્થો
    મત્સ્વાન્તદુર્દાન્થયેચ્છુરાસ્તામ્ ॥ ૧॥

યદ્યત્નતઃ શમદમાત્મવિવેકયોગૈ-
    રધ્યાત્મલગ્નમવિકારમભૂન્મનો મે ।
રૂપસ્ય તત્સ્મિતસુધં સદયાવલોકં
    આસાદ્ય માદ્યતિ હરેશ્ચર્તૈરિદાનીમ્ ॥ ૨॥

નિભૃતવિપિનલીલાઃ કૃષ્ણવક્ત્રં સદાક્ષ્ણા
    પ્રપિબથ મૃગકન્યા યૂયમેવાતિધન્યાઃ ।
ક્ષણમપિ ન વિલોકે સારમેયી વ્રસ્થાપ્ય્-
    ઉદરભરણવૃત્ત્યા બમ્ભ્રમન્તી હતાહમ્ ॥ ૩॥

મન્માનસોન્મીલદનેકસઙ્ગમ
    પ્રયાસકુઞ્જોદરલબ્ધસઙ્ગ્યોઃ ।
નિવેદ્ય સખ્યર્પય માં સ્વસેવને
    વીટીપ્રદાનાવસરે વ્રજેશયોઃ ॥ ૪॥

નિવિડરતિવિલાસાયાસગાઢાલસાઙ્ગીં
    શ્રમજલકણિકાભિઃ ક્લિન્નગણ્ડાં નુ રાધામ્ ।
વ્રજપતિસુતવક્ષઃપીઠવિન્યસ્તદેહાં
    અપિ સખિ ભવતીભિઃ સેવ્યમાનાં વિલોકે ॥ ૫॥

દિતિજકુલનિતાન્તધ્વાન્તમશ્રાન્તમસ્ય-
    ન્સ્વજનજનચકોરપ્રેમપીયૂષવર્ષી

કરશિશિરિતરાધાકૈરવોત્ફુલ્લવલ્લી
    કુચકુસુમગુલુચ્છઃ પાતુ કૃષ્ણૌષધીશઃ ॥ ૬॥

રાસે લાસ્યં રસવતિ સમં રાધયા માધવસ્ય
    ક્ષ્માભૃત્કચ્છે દધિકરકૃતે સ્ફારકેલીવિવાદમ્ ।
આલીમધ્યે સ્મરપવનજં નર્મભઙ્ગીતરઙ્ગં
    કાલે કસ્મિન્કુશલભરિતે હન્ત સાક્ષાત્કરોમિ ॥ ૭॥

રોહિણ્યાગ્રે કૃતાશીઃશતમથ સભયાનન્દમાભીરભર્તા
    ભીત્યા શશ્વન્નૃસિંહે હલિનિ સખિકુલે ન્યસ્ય સાસ્રં વ્રજેશ્યા ।
સાટોપસ્નેહમુદ્યદ્વ્રજજનનિવહૈ રાધિકાદિપ્રિયાભિઃ
    સશ્લાઘં વીક્ષ્યમાણઃ શ્રિતસુરભિરટન્નવ્યગોપઃ સ પાયાત્ ॥ ૮॥

અદૃષ્ટા દૃષ્ટેવ સ્ફુરતિ સખિ કેયં વ્રજવધૂઃ
    કુતોઽસ્મિન્નાયાતા ભજિતુમતુલા ત્વાં મધુપુરાત્ ।
અપૂર્વેણાપૂર્વાં રમય હરિણૈનામિતિ સ રા-
    ધિકોદ્યદ્ભઙ્ગ્યુક્ત્યા વિદિતયુવતિભ્યઃ સ્મિતમધાત્ ॥ ૯॥

રાધેતિ નામ નવસુન્દરદીધુમુગ્ધં
    કૃષ્ણેતિ નામ મધુરાદ્ભુતગાઢદુગ્ધમ્ ।
સર્વક્ષણં સુરભિરાગહિમેન રમ્યં
    કૃત્વા તદેવ પિબ મે રસને ક્ષુધાર્તે ॥ ૧૦॥

ચૈતન્યચન્દ્ર મમ હૃત્કુમુદં વિકાશ્ય
    હૃદ્યં વિધેહિ નિજચિન્તનભૃઙ્ગરઙ્ગૈઃ ।
કિં ચાપરાધતિમિરં નિવિડં વિધૂય
    પાદામૃતં સદય પાયય દુર્ગતં મામ્ ॥ ૧૧॥

પિકપટુરવવાદ્યૈર્ભૃઙ્ગઝઙ્કારગાનૈઃ
    સ્ફુરદતુલકુડુઙ્ગક્રોડરઙ્ગે સરઙ્ગમ્ ।
સ્મરસદસિ કૃતોદ્યન્નૃત્યતઃ શ્રાન્તગાત્રં
    વ્રજનવયુવયુગ્મં નર્તકં વીજયામિ ॥ ૧૨॥

યત્પાદામ્બુજયુગ્મવિચ્યુતરજઃસેવાપ્રભાવાદહં
    ગાન્ધર્વાસરસીગિરીન્દ્રનિકટે કષ્ટોઽપિ નિત્યં વસન્।
તત્પ્રેયોગણપાલિતો જિતસુધા રાધામુકુન્દાભિધા
    ઉદ્ગાયામિ શ ૃણોમિ માં પુનરહો શ્રીમાન્સ રૂપોઽવતુ ॥ ૧૩॥

ઇતિ શ્રીરઘુનાથદાસગોસ્વામિવિરચિતસ્તવાવલ્યાં
શ્રીઅભીષ્ટસૂચનં સમ્પૂર્ણમ્ ।

---

*Collected prayers by Raghunatha Dasa Goswami Stavavali*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*